# ॥ सप्तमः सर्गः ॥

॥ श्रीगणेशाय नमः ॥ श्रीमन्नृसिंहाय नमः ॥

इदानीं नलस्वरूपमेव वर्ण्यते —

अथ प्रियासादनशीलनादौ मनोरथः पल्लवितः पुरा यः।
विलोकनेनैव स राजपुत्र्याः पत्या भुवः पूर्णवदभ्यमानि ॥१॥

अनन्तरं मनोरथो भुवः। पत्या नलेन दमयन्त्या दर्शनमात्रेण परमकोटिप्राप्त इवाभिज्ञातः। स क इत्याह। यः प्रेयसीप्राप्तिपरिचयसंभाषणादिविषये प्रथमं सञ्जात-किसलयः। पल्लवानन्तरं हि अकाण्डलतादिक्रमेण लताविटपादयो विवृध्य पूर्णतां यान्ति। अयं तु पल्लवानन्तरमेव पूर्ण इति विशेषः। पूर्णता तु फल-सम्पत्तिः। अथवा पल्लवपुष्पफलसम्भवक्रमोऽत्र शाह्यः। वाञ्छितोऽर्थो मनोरथः ॥१॥

प्रतिप्रतीकं प्रथमं प्रियाया मथान्तरानन्दसुधासमुद्रे।
ततः प्रमोदाश्रुपरम्परायां ममज्जतुस्तस्य दृशौ नृपस्य ॥२॥

तस्य नृपस्य दृशौ पूर्वं प्रत्यवयवं दमयन्त्यामङ्गे पश्चादाभ्यन्तरहर्षपीयूषसागरे अनन्तरं हर्षाश्रुधारायां ममज्जतुरिति संबन्धः ॥२॥

ब्रह्माद्वयस्यान्वभवत्प्रमोदं रोम्णोऽग्र एवाग्निरीक्षितेऽस्याः।
यथोचितीत्थं तदशेषदृष्टावथ स्मराद्वैतमुदं तथासौ ॥३॥

अस्या भैम्या एकस्यैव रोम्णोऽग्रे कोटावेवाग्निरीक्षिते प्रथमदृष्टे सत्यसौ नलो ब्रह्माद्वयस्य ब्रह्मैक्यस्य प्रमोदं हर्षमन्वभवत् उपलेभे। अथानन्तरं तदशेषदृष्टौ तस्याः समग्रावलोकने सति, स्मराद्वैतमुदं कामैक्यहर्षमन्वभवत्। कथं तथा? तथा कथमित्याह। इत्थमेवं सति यथा येन प्रकारेण औचिती योग्यता यथा युज्यते। एकस्य रोम्णः कोटौ दृष्टायां चेदीदृशः प्रमोदस्तर्हि तस्याः समग्राया दर्शने तस्य नितान्तमानन्त्यमेव युक्तितोऽवगम्यते ॥३॥

वेलामतिक्रम्य पृथुं मुखेन्दोरालोकपीयूषरसेन तस्याः।
नलस्य रागाम्बुनिधौ विवृद्धे तुङ्गौ कुचावाश्रयतः स्म दृष्टी ॥४॥

प्रथमं रसात् तेन तस्याः पृथुपीनयोः स्तनयोर्दृष्टिर्व्यापारितेति एतदेव भङ्ग्या कविराह। तस्या मुखेन्दुरालोकपीयूषरसेन दर्शनामृतद्रवेण नलस्य रागाम्बुनिधौ प्रेमाब्धौ पृथुं वेलां तटभूमिमतिक्रम्य समुल्लङ्घ्य विवृद्धे सति, ब्रुडनभयात् दृष्टी

तुङ्गौ उन्नतौ कुचौ वक्षोजावाश्रयतः स्म भेजतुः। अन्यावपि कौचिच्चन्द्रदर्शनात्
तद्भुवं पृथुलामुल्ल- [143.6] -ङ्घ्य जलधावुल्लसिते सति ब्रुडनभयात् तुङ्गौ प्रदेशौ
गिरिशिखरप्रमुखावाश्रयतः। तच्च्युतस्तु पृथुं वेलामधिकं कालं त्यक्त्वा तत्क्षणमेवेत्यर्थः ॥४॥

मग्ना सुधायां किमु तन्मुखेन्दोर्लग्ना स्थिता तत्कुचयोः किमन्तः।
चिरेण तन्मध्यममुञ्चतास्य दृष्टिः कृशीयः स्खलनाद्भिया नु ॥५॥

मुखस्तनमध्येषु रामणीयकातिशयलोभान्नलस्य दृष्टिश्चिरं विश्रान्ता, तत्र कविरुत्प्रे-
-क्षते। अस्य दृष्टिर्भैमीवदनचन्द्रस्यामृते किं मग्ना। कुचयोर्निर्विवरत्वं प्रसिद्धमेव।
तन्मध्यं तस्या उदरं नु कृशीयस्त्वस्खलनादतितनुतरगतिभङ्गाधिकाभीभयं तया चिरेणा-
-मुञ्चत। खातिकापट्टिका हि कृशीयसी स्खलनभयेन मन्दं मन्दं चलता पुरुषेण
चिरेण मुच्यते ॥५॥

प्रियाङ्गपान्थी कुचयोर्निवृत्य निवृत्य लोला नलदृग्भ्रमन्ती।
बभौ तमां तन्मृगनाभिलेपतमःसमासादितदिग्भ्रमेव ॥६॥

भैमीनानावयवपथिकी नलस्य चञ्चला दृष्टिः प्रतिगत्य प्रतिगत्य स्तनयोः
पर्यटन्ती नितरां रेजे। उत्प्रेक्ष्यते। तयोः कस्तूरीसमालम्भनेनैव तमसा प्राप्तदिग्-
-मोहेव। तत्र हि भ्रमरनीला कस्तूरी लेपरूपास्ति, तदेव च कार्ष्ण्यात् तमः।
तमसा च दिशां मोहो भवत्येव। अन्यापि पान्थी क्वापि प्रचलिता सती कस्मिन्नपि
ग्रामे वने वा तमसा दिङ्मोहं प्राप्य निवृत्य निवृत्य तत्रैव बम्भ्रम्यते। स्त्रीणां च विशेषतो
दिङ्मोहः। मृगमदमुद्रितघनस्तनलोभेनाङ्गान्तरं पिपासुरपि कियद्दूरं गत्वा गत्वा तत्रैव
भ्रान्तेत्यर्थः। स्मरज्वरवैकल्याद्दोहोवृत्ताद् वा स्तनौ विवृतावेव बोद्धव्यौ। अन्यथा दिक्-
-भ्रमहेतुभूततमस्तया स्थगितायाः कस्तूरिकायाः कथं दर्शनम्। परिमलाद् वाऽनुमिता।
तर्हि तथा तस्यास्तमोरूपेण तत् कार्यकरणं न घटेत। न हि धूमादनुमितमात्रो वह्नि-
-रनुमातुः पाकादिसाधकोऽपि तु प्रत्यक्षीकृत्य पावकः करणत्वेन संयोजितः ॥६॥

विभ्रम्य तच्चारुनितम्बचक्रे दूतस्य दृक् तस्य खलु स्खलन्ती।
स्थिरा चिरादास्त तदूरुरम्भास्तम्भावुपाश्लिष्य करेण गाढम् ॥७॥

तस्या नितम्ब एव चक्रं कुलालोपकरणं तत्र विशेषतो भ्रान्त्वा नूनं तस्य
दूतस्य दृक् स्खलन्ती स्थितेर्विसंस्थुलत्वं प्राप्नुवती सती, तस्या ऊरू एव रम्भा-
-स्तम्भौ कदलीस्थूणाविशेषौ करेण हस्तेन दृढमवष्टभ्य चिरं निश्चलाऽस्ते स्म।
-ष्टभ्य

तत्त्यतस्तु करेण रश्मिना विभ्रम्य विशिष्टं मोहं विलासं वा प्राप्य। अन्योऽपि कुलालचक्रमधिष्ठाय बहुभ्रमन् यदि स्खल-[144.a]-ति, तदा समीपस्थे स्थूणे करद्वयेन गाढमवष्टभ्य चिरं स्थिर एवास्ते। [1]अत्राप्येवंविधेतरदृष्टिवेष्टिते रमणीयकमेव कारणीभूतमवगम्यं एवमन्यत्र ॥७॥

वासः परं नेत्रमहं न नेत्रं किमु त्वमालिङ्गय तन्मयापि।
उरोनितम्बोरु कुरु प्रसादमितीव सा तत्पदयोः पपात ॥८॥

सा नलदृष्टिः क्रमात् तस्याः पादयोः पतिता। उत्प्रेक्ष्यते। इत्यस्माद्धेतोरिव। इति कथमित्याह। हे सुन्दरि! परं केवलं वासो वस्त्रमेव नेत्रं वर्तते। अहं किमु नेत्रं न भवामि। काक्वा, अपि तु यथा वसनं नेत्रमेवमहमपि नेत्रं वर्ते (वर्तते)। तस्मात् कारणात् यथाऽनेन वाससा नेत्रेण प्रयोज्येन कर्त्रा त्वया। उरोनितम्बोरु आलिङ्गितमस्ति तथा मयाऽप्यालिङ्गयाश्लेषय। प्रसादं कुरु। [2]एकैकस्मै गुणवते ब्राह्मणादिजातये वा यदि कश्चिद्दातुं गुणनिदानं जातिनिदानं वा दानमानादिकं कुरुते, तदाऽन्यो गुणी ब्राह्मणादिजातिर्वा सामान्यतया तस्मात् तद् वाञ्छत्येव। दक्षिणदेशजं चित्रवर्णमिति धौतं वासो नेत्रम्। उरश्च नितम्बश्च ऊरू च उरोनितम्बोरु। प्राण्यङ्गत्वात् समाहारः। एतच्च नेत्राख्येन वाससाऽऽच्छादितत्वाद् दृष्टेरविषयः। अतो नलस्य बलीयसी तद्दिदृक्षा। प्रसादं कुरु, आलिङ्गयेति लोकोक्तिसमाश्रयणेन। आलिङ्गनमेव प्रसादत्वेन पर्यवस्यति ॥८॥

दृशोर्यथाकाममथोपहृत्य स प्रेयसीमालिकुलं च तस्याः।
इदं प्रमोदाद्भुतसम्भृतेन महीमहेन्द्रो मनसा जगाद ॥९॥

अथ स भूशक्रो भैमीं तत् सखीवर्गं च यथेच्छं नेत्रयोरुपायनीकृत्य हर्षचित्रनिर्भरेण चेतसा इदं वक्ष्यमाणमूचे ॥९॥

पदे विधातुर्यदि मन्मथो वा ममाभिषिच्येत मनोरथो वा।
तदा घटेतापि न वा तदेतत्प्रतिप्रतीकाद्भुतरूपशिल्पम् ॥१०॥

सुष्ठुः स्थाने यदि वा कामः प्रतिष्ठाप्येत, यदि वा ममाभिलाषः प्रतिष्ठाप्येत तदापि तदेतदुपलभ्यमानं प्रत्यवयवचित्रविधायि सौन्दर्यविज्ञानं घटेत सम्भवेन्न वा ॥१०॥

---

1. B1. om. अत्राप्येवं ----- एवमन्यत्र। 2. B. एकस्मै.

तरङ्गिणी भूमिभृतः प्रसूता जानामि शृङ्गाररसस्य सेयम् ।
लावण्यपूरोऽजनि यौवनेन यस्यां तथोच्चैः स्तनता घनेन ॥११॥

मन्ये सेयं भूमिभृतः पर्वतात् प्रसूता जाता शृङ्गाराख्यस्य रसस्य द्रव्यविशेषस्य तरङ्गिणी नदी वर्तते । यस्यां लावण्यस्य पूरः समुपचितप्रसृतप्रवाहरूपो यौवनेन तारुण्येनैव घनेन मेघेन उच्चैरधिकं स्तनता गर्जता सता अजनि जनितः । इति श्लोकस्यार्थः । तत्त्वतस्तु भूमिभृतो नृपात् शृङ्गाराख्यो रसनीयत्वाद् रसापर-संज्ञो घनेन निबिडेन यौवनेन यस्यामुच्चैःस्तन-[144.6]-ता समुन्नतवक्षोजता-जनितेति । भूमिभृतः प्रसूतेति पाठो युज्यते । दृश्यते तु प्रायः 'प्रसूता' इति ॥११॥

अस्यां वपुर्व्यूहविधानविद्यां किं द्योतयामास नवामवाप्ताम् ।
प्रत्यङ्गसङ्गस्फुटलब्धभूमा लावण्यसीमा यदिमामुपास्ते ॥१२॥

लावण्यसीमा कर्त्री । अस्यां भैम्यां विषये नवामवाप्तां नूतनां लब्धां वपुषां व्यूहः समूहो बहूनि वपूंषि । वपुर्व्यूहस्य विधाने करणे तस्य विद्या विज्ञानं तां किं द्योतयामास, प्रकाशयति स्म । यत्कारणादिमां दमयन्तीं प्रत्यङ्गसङ्गस्फुटलब्धभूमा सत्युपास्ते सेवते । प्रत्यङ्गसङ्गेन स्फुटो लब्धो भूमा बाहुल्यं यया सा तथा । प्रत्यङ्गसङ्गतो हि लावण्यावधिरत्र तिष्ठति । एवं वाक्यार्थमबुद्ध्यमानाः 'किं द्योतयामास नवां स कामः' इति पठन्ति । अन्योऽपि नवां लब्धां विद्यां द्योतयति ॥१२॥

जम्बालजालात् किमकर्षि जम्बूनद्या न हारिद्रनिभप्रभेयम् ।
अप्यङ्गयुग्मस्य न सङ्गचिह्नमुन्नीयते दन्तुरता यदत्र ॥१३॥

इयं हारिद्रनिभप्रभा नितान्तगौरकान्तिः जम्बूनद्या जम्बालजालात् पङ्कपटलात् किं नाकर्षि । काक्वा, अपि तु तस्मादेवाकृष्टेति सम्भावना । यत् कारणात् अत्रास्या-मङ्गयुग्मस्यापि चिह्नमवयवसन्धेरपि लक्ष्म दन्तुरता उच्चनीचता विसंस्थुलता नोन्नीयते, न दृश्यते । जम्बूनदी च सौवर्णद्रववाहिनी प्रसिद्धैव । तस्याः कर्दमोऽपि सौवर्ण एव ॥१३॥

सत्येव साम्ये सदृशादशेषाद् गुणान्तरेणोच्चकृषे यदङ्गैः ।
अस्यास्ततः स्यात् तुलनापि नाम वस्तु त्वमीषामुपमापमानः ॥१४॥

साम्ये सादृश्ये सत्येव विद्यमान एव । यत्कारणादस्या अङ्गैर्मुखनयनपाणादिभि-रशेषात् समग्रात् सदृशात् समानात् चन्द्रकमलपल्लवादेः सकाशाद् गुणान्तरेण

केनापि गुणेनान्येन कृत्वोच्चकृष उत्कृष्टैर्भूतम्। ततः कारणादमीषामस्या अङ्गानां तुलनाऽपि नाम स्याद्, वरं साम्यं भवेत्। नु पुनः वस्तुनि कृष्ट उपमाऽपमानो भर्त्सनमसत्कारः। अयमर्थः। एतदङ्गानां चन्द्रकमलादिभ्यः सकाशाद् विभ्रमादिना गुणान्तरेणाधिक्यम्। ततोऽधिकस्य न्यूनेन सह तुलनाऽपि न युक्ता। वरं साऽपि नाम भवतु। नामेत्यरुचिगर्भेऽङ्गीकारे। उपमायस्त्वपमानोऽसत्कार एव। अधिकगुणस्य हीनगुणमुपमानं निन्द्यैव। प्रसिद्धं ह्युपमानमप्रसिद्धमुपमेयं, न त्वप्रसिद्धमुपमानं प्रसिद्धमुपमेयमिति। वस्तुशब्दोऽत्र लोकोक्त्या निन्दाद्योतकः॥१४॥

पुराकृतिः स्त्रैणमिमां विधातुमभूद्विधातुः खलु हस्तलेखः।
येयं भवद्भावि-[145.b]-पुरंध्रिसृष्टिः सास्यै यशस्तज्जयजं प्रदातुम्॥१५॥

पुराकृतिराद्या निर्मितिः स्त्रैणम्। स्त्रीसमूहो धातुर्ब्रह्मणो हस्तलेखोऽभूत्। किं कर्तुम्? विधातुं निर्मातुम्। काम्? इमाम्। हस्तस्थैर्यसिद्ध्यै लेखो हस्तलेखः। स च विचित्रपुस्तकलिप्यादिनिर्मितये क्रियते। येयं दृश्यमाना भवन्तीनां भाविनीनां पुरन्ध्रीणां सृष्टिः, सा तज्जयजं यशोऽस्यैव प्रकर्षेण दातुम्। वस्तुनिर्माणकला-कौशलेऽपि कदापि कस्मिन्नपि वस्तुनि प्राचीनेऽपि रेखाविशेषः समुत्पद्यते। वस्तुप्रतिवस्तुनोस्तूत्कर्षापकर्षौ संनिधैरेव ज्ञायेते। भवन्तीनां भाविनीनां च सर्वासां स्त्रीणां मध्ये खल्वियमेव विशिष्टेति ज्ञापयितुं सा सृष्टिरित्यर्थः। अपरा-ऽर्थसङ्गतिः स्वमत्यैव मतिमद्भिर्वितानयितव्या। अयं वाक्यार्थो हि यथावत् सामस्त्येनाक्षरगुम्फेन प्रकाशयितुमसुकरः॥१५॥

भव्यानि हानीरगुरेतदङ्गाद्यथा यथानर्ति तथा तथा तैः।
अस्याधिकस्योपमयोपमाता दाता प्रतिष्ठां खलु तेभ्य एव॥१६॥

भव्यानि वस्तूनि चन्द्रकमलादीन्येतदङ्गान् मुखनयनादेः सकाशाद् यथा हानीः पराजयानगुर्यन्ति स्म। तथा तथा भव्यैरनर्ति वलितम्। खलु यस्मादुपमाता कविवरः। तेभ्य एव भवेभ्यः प्रतिष्ठां दाता, गौरवं दास्यति। कया? अस्या दमयन्त्या अङ्गस्याधिकस्योपमया कृत्वा कविवरो हि नोपमां विना कथयति[1]। उत्कृष्टगुण-वस्तुदारिद्र्यादपकृष्टगुणमपि वस्तूपमानतां स नयत्येव। एवं चापकृष्टानामुत्कृष्टोपमानत्वे गौरवम्॥१६॥

---

1. B1 कथयति

नास्पर्शि दृष्टापि विमोहिकेयं दोषैरशेषैः स्वभियेति मन्ये ।
अन्येषु तैराकुलितस्तदस्यां वसत्यसापत्न्यसुखी गुणौघः ॥१७॥

इयं यतो दृष्टापि विमोहिका मोहयित्री । अर्थाद्यूनामथ च सामान्येन । अतः समग्रैरपि दूषणैर्निजभयेनैव न स्पृष्टेति जानामि । या दृष्टापि विमोहिका सा स्पृष्टा सती न जानीमः । किं करिष्यतीति शङ्कमानैरित्यर्थः । तत् कारणादस्यां विषये गुणानामोघोऽसापत्न्येनाप्रतिपक्षभावेन सुखी निवृत्तः सन् वसति तिष्ठति । कीदृशः? अन्येषु चन्द्रकमलादिषु तैर्दोषैर्लाञ्छनादिभिराकुलितो व्यासक्तीकृतः ॥१७॥

औज्झि प्रियाङ्गैर्घृणयैव रूक्षा न वारिदुर्गात् तु वराटकस्य ।
न कण्टकैरावरणाच्च कान्तिर्धूलीभृता काञ्चनकेतकस्य ॥१८॥

अन्येषु यानि दूषणानि तानि प्रकटयति । प्रियाङ्गैर्वराटकस्य कमलबीजकोशस्य कान्तिर्यदौज्झि दूरे निरस्ता तद् घृणया जुगुप्सयैव किमस्या जुगुप्सितया जयनेति । [145-6] न तु वारिदुर्गाज्जलदुर्गभयेन 'जलदुर्गस्थेयं दुर्जये' इति कृत्वा न । कुतो घृणेत्याह । यतो रूक्षा स्निग्धेतरा । इयं तु वर्णसाम्येऽपि स्निग्धत्वादतिरिच्यते । काञ्चनकेतकस्य सुवर्णकेतकीकुसुमस्य च कान्तिर्घृणयैवौज्झि अवहेलिता । न तु कण्टकैरावरणात् वेष्टनात् । कण्टकवेष्टितं हि दुर्ग्राह्यं भवति परमन्येषाम् । नन्वियमस्याः किमिति घृणेत्याह । यतो धूलीभृता च्छारभरीति लोकप्रसिद्धनिन्द्या विषया । तत्त्वतस्तु केतकी-कुसुमगर्भे भूयसी सृष्टिस्वभावजा धूली विद्यत एव ॥१८॥

प्रत्यङ्गमस्यामभिकेन रक्षां कर्तुं मघोनेव निजास्त्रमस्ति ।
वज्रं च भूषामणिमूर्तिधारि नियोजितं तद्द्युतिकार्मुकं च ॥१९॥

उत्प्रेक्षते । मघोनेन्द्रेण निजमस्त्रं नियोजितं, व्यापारितमस्ति । किं निजास्त्रमित्याह । वज्रं कार्मुकं च, द्वे अपीत्यर्थः । वज्रं कीदृशम्? भूषामणिमूर्तिधारि । अलङ्काररत्नरूप-भृत् । कार्मुकं कीदृक्? तद्द्युति । तस्य भूषामणिरूपधारिणो वज्रस्य द्युतिर्यत्र तत् तद्द्युति । द्युतिरूपत्वेऽपि धनुषोऽत्र भेदः प्रतिपादनीयः । यथा राहोः शिरः । तद्द्युतिरेव कार्मुकं तद्द्युतिकार्मुकमिति समसितव्याख्याने च न तथा पदार्थः सङ्गच्छते । क्व नियोजितमित्याह । अस्यां भैम्याम् । कथम्? प्रत्यङ्गं सर्वेष्वङ्गेषु । किं कर्तुं नियोजितमित्याह । रक्षां गोपनं कर्तुम् । यतः कीदृशेन? अभिकेन कामुकेनार्थात् तस्यामेव क्वापि नृप-मन्दिरादौ रक्षानियुक्तानां धनुःप्रभृतीन्यायुधान्येव यथायुक्ति पुञ्जीकृत्य पृथक्कृत्य

च धृतानि दृश्यन्ते। तथाऽत्र बद्धकृता वज्रजातिर्धनुर्जातिश्च। वज्रशब्दस्योभयार्थत्वादयमर्थः। तथा चानेकार्थः। वज्रोऽस्त्री हीरके पवौ। ऐन्द्रं धनुस्तु नानावर्णकान्तिव्यतिकरजमेव। अलङ्कृतिवर्णनमिदम् ॥१९॥

इदानीमुत्तमाङ्गादारभ्य तां नृपतनयां वर्णयति—

अस्याः सपक्षैकविधोः कचौघः स्थाने मुखस्योपरि वासमाप।
पक्षस्थतावद्बहुचन्द्रकोऽपि कलापिनां येन जितः कलापः ॥२०॥

अस्याः कचानामोघो भारः मुखस्योपरिस्थाने युक्तं वासमाप। कीदृशस्य? सपक्षः सहायभूत एक एव विधुर्यस्य तत् तथा तस्य। एक एव चन्द्रो यस्य सहायभूतः कः कचौघ इत्याह। येन कलापिनां कलापो जितः। कीदृशः?। पक्षस्थाः सहायास्तावन्तो बहवोऽसङ्ख्याताश्चन्द्रा यस्य स तथा। बहुव्रीहौ शेषाद्वेतिकः। येन हि बहुसहायः प्रतिपक्षो जितः, स एकसहायं प्रतिपक्षं जित्वा, तदुपरि स्थितिं करोतीति युक्तमेव। तत्त्वतस्तु सपक्ष उपचारवृत्त्या सदृशः। समानः पक्षः सपक्षः। पक्षेषु पतत्रेषु तिष्ठन्तीति पक्षस्था एवंभूतास्तावन्तो बहवश्चन्द्रका हृस्वाश्चन्द्रा यस्य स तथा। [146·a] जयप्रलम्बनादिसंस्थानकृत एव पक्षः सहायेऽपि सपक्षैकविधोरत्र भावितपुंस्कत्वात् त्वागमाभावः ॥२०॥

अस्या यदास्येन पुरस्तिरश्च तिरस्कृतं शीतरुचान्धकारम्।
स्फुटस्फुरद्भङ्गकचच्छलेन तदेव पश्चादिदमस्ति बद्धम् ॥२१॥

अस्या आस्येनैव शीतरुचा चन्द्रेण पुरोऽग्रे तिरः पार्श्वद्वये च यदन्धकारं तिरस्कृतं क्षिप्तं तदेवेदं पश्चात् पृष्ठदेशे बद्धं संयतमस्ति। अर्थादास्येनैव केन कृत्वा बद्धमस्तीत्याह। स्फुटः प्रकटः स्फुरन् दृश्यमानो भङ्गः पराजयो यत्रैवंभूता ये कचास्तेषां छलेन व्याजेन तदेवेदमित्यर्थः। जितो हि बध्वा, पश्चात् क्षिप्यते। तत्त्वतस्तु शीता सौम्या निवृत्तिकरी रुचिः कान्तिर्यस्येति विशेषणमात्रम्। छलपक्षे भङ्गो रणे पराजयः, तत्त्वपक्षे भङ्गः कौटिल्यम् ॥२१॥

अस्याः कचानां शिखिनश्च किं नु विधिं कलापौ विमतेरगाताम्।
तेनाययमेभिः किमपृच्छि पुष्पैरभर्त्सि दत्त्वा स किमर्धचन्द्रम् ॥२२॥

अस्याः कचानामेकः शिखिनो मयूरस्य चैकः। द्वौ कलापौ किं नु भृशं सम्भावयामि। किं विधिं सृष्टारमगातां प्राप्तौ। कुतः? विमतेर्विप्रतिपत्तेः। विवादाद् विप्रतिपत्तिश्च

स्फारतादिविषयिणी गम्या। ततः किं जातमित्याह। तेनैव विधिना किमयमस्याः कच-कलापो जयवादित्वादेभिः प्रत्यक्षैः पुष्पैरपूजि। स च शिखिकलापोऽर्धचन्द्रं दत्वा अभिर्त्सि भर्त्सितो हीनवादित्वात् निष्कासित इत्यर्थः। अर्धचन्द्राकारो हस्तसंस्थानविशेषोऽर्धचन्द्रो गलहस्तसंज्ञः। तत्त्वतस्त्वर्धचन्द्राः शिखिकलापे प्रसिद्धा एव। पूर्वार्धे प्रतिज्ञा, उत्तरार्धे हेतुरुद्भावितः। कुसुमवर्णनात् कवेः स्मृत्युन्मेषो गम्यते। अन्यावपि क्वापि वस्तुनि विवदमानौ विधिं न्यायं यातः। विधिर्न्यायः एव त्वत्र प्रयुज्यते। विधिश्चोपचारात् तदधिष्ठितपुरुषः। ब्रह्मा तु तत्कर्तृत्वात् तद् गुणागुणं सम्यग् वेत्तीति व्याख्यातः ॥२२॥

केशान्धकारादथ दृश्यभालस्थलार्धचन्द्रा स्फुटमष्टमीयम्।

एतां यदासाद्य जगज्जयाय मनोभुवा सिद्धिरसाधि साधु ॥२३॥

इयं दमयन्ती स्फुटं प्रकटमेवाष्टमी नाम तिथिरिति प्रतिज्ञाहेतुमाह। कीदृशी? केशा एवान्धकारं तस्मादथ पश्चात् दृश्यभालस्थलमेवार्धचन्द्रो यस्यां सा। किं च हेत्वन्तर-मप्यस्त्यष्टमी त्वेतदाह। यत्कारणादेतामासाद्य मनोभुवा स्मरेण जगज्जयाय विश्व-वशीकरणाय साधु सम्यक् सिद्धिः कामितप्राप्तिलक्षणा निष्पादिता सम्पूर्णतां नीता। एतच्च त्रैलोक्यस्यैतदर्थमेव मिलितत्वात् प्रत्यक्षमेव युक्त्या चेयं कृष्णाष्टमी। तस्यामेव ह्यन्धकारादनन्तरमर्धस्य चन्द्रमस उदयः। अन्यैरपि सा-[146.6]-हसिकै-रष्टम्यां जगद्वशीकरणाय सिद्धिः साध्यते ॥२३॥

पुष्पं धनुः किं मदनस्य दाहे श्यामीभवत्केसरशेषमासीत्।

व्यधाद् द्विधेशस्तदपि क्रुधा किं भैमीभ्रुवौ येन विधिर्व्यधत्त ॥२४॥

मदनस्य पुष्पमेव धनुर्दाहे दहने सति, किं श्यामीभवत् केसरशेषमभूत्। अश्यामः श्यामो भवन्। केसरः किञ्जल्क एव शेष उद्धृतोंऽशो यस्य तत् केसरमात्रावशिष्टमि-त्यर्थः। ईशो भगवान् क्रुधा कोपेन तदपि केसरावशेषमपि किं द्विधा व्यधात् द्विखण्डी-चकार। येन द्विखण्डीभूतेन तेनैवैवंरूपकेसरशेषेण मदनधनुषा विधिर्भैम्या भ्रुवौ विहित-वान्। दमयन्तीभ्रुवोस्तद्रूपयोर्दर्शनादित्यमूहः ॥२४॥

भ्रूभ्यां प्रियाया भवता मनोभूचापेन चापे घनसारभावः।

निजां यदप्लोषदशामपेक्ष्य सम्प्रत्यनेनाधिकवीर्यतार्जि ॥२५॥

प्रियाया भ्रूम्याँ भवता भ्रूद्वयरूपेण परिणमता मनोभूचापेन स्मरधनुषा च घन-
-सारभाव आपे लब्धः। घनो निबिडः सारः स्थिरांशो यस्य तस्य भावः सान्द्रस्थिरां-
-शत्वम्। यत् कारणादनेन मनोभूचापेन निजामात्मीयाम् प्लोषदशामदाहावस्थामपेक्ष्या-
-कांक्ष्य सम्प्रतीदानीमधिकवीर्यता प्रभूतशक्तित्वमर्जिता प्राप्ता। अदग्धान्मन्मथधनुषो
हि दमयन्तीभ्रूभूतस्य दग्धस्य महती शक्तिरुपलभ्यते। अथ चार्थान्तरम्।

घनसारभावः कर्पूरत्वम्। सोऽपि ह्यपरिपाकदशातः परिपाकदशायामधिकवीर्यो
भवति। परिपचनं च कर्पूरस्य तद्विद एव पृष्टव्याः[1]। 'घनसारश्चन्द्रसंज्ञः कर्पूरो
हिमवालुका' ॥२५॥

स्मारं धनुर्यद्विधुनोज्झितास्या यास्येन भूतेन च लक्ष्मलेखा।
एतद्भ्रुवौ जन्म तदाप युग्मं लीलाचलत्वोचितबालभावम् ॥२६॥

यत् स्मरसंबन्धि धनुर्या च चन्द्रेण लक्ष्मलेखा लाञ्छनराजिरुज्झिता त्यक्ता।
कीदृशेन? अस्या आस्येन भूतेन मुखत्वेन परिणतेन। चन्द्र एव खलु दमयन्तीवदनी-
-भूतोऽस्ति, परं लाञ्छनमुज्झित्वा। एतस्या भ्रुवौ साक्षात् तदेव द्वयं जन्माप प्रसवं लेभे।
एतद्भ्रूरूपं तदेव नूतनं जातमस्ति। यतः कीदृशम्?। लीलया हेलया चलतीति लीला-
-चलम्। तस्य भावो लीलाचलत्वं तत्रोचितो योग्यो बालभावः शैशवं यस्य तत् तथा।
शिशुत्वे लीलाचलत्वमुचितमेव। शिशवो हि लीलया चलन्ति। तत्त्वतस्तु लीलाचलत्वे
विभ्रमभ्रमणे उचिते। बालानां रोम्णां भावश्चेष्टाविशेषो यत्र तत् तथा। दमयन्तीभ्रूयुगे
वर्तमानस्य बालभावस्य विभ्रमेण भ्रमणं युक्तमेव। सा हि लीलावती। [147.a]
बवयोरैक्यादियमुक्तिः ॥२६॥

इषुत्रयेणैव जगत्त्रयस्य विनिर्जयात् पुष्पमयाशुगेन।
शेषा द्विबाणी सफलीकृतेयं प्रियादृगम्भोजपदेऽभिषिच्य ॥२७॥

कुसुमशरेणावशिष्टा द्विशरी भैमी नेत्रस्थाने प्रतिष्ठाप्य सार्थकीकृता। कस्मात्?
बाणत्रयेणैव भुवनत्रयस्य वशीकृतत्वात्। तेन हि यथासङ्ख्यं कुसुममार्गणत्रयेण
भुवनत्रयं विनिर्जितम्। अतोऽन्यद्बाणद्वयं निरुपयोगि वीक्ष्य भैमीचक्षुः सरोजीकृत्य
सोपयोगीकृतम्। तयोस्तत्कार्यकारणादेव मुक्तिः। द्वयोर्बाणयोः समाहारो द्विबाणी ॥२७॥

सेयं मृदुः कौसुमचापयष्टिः स्मरस्य मुष्टिग्रहणार्हमध्या।
तनोति नः श्रीमदपाङ्गमुक्तां मोहाय या दृष्टिशरौघवृष्टिम् ॥२८॥

---

1. B1. प्रष्टव्याः

सेयं कोमलाङ्गी। अतः स्मरस्य कौसुमी चापयष्टिर्धनुर्लता। कीदृशी? । मुष्टिग्रहणे-ऽर्हो मध्यो यस्याः सा। धनुर्लताया हि मध्यो मुष्टिग्रहणार्हः प्रसिद्धः। या नो-ऽस्माकं मोहाय मूर्च्छायै श्रीमता कान्तिमताऽपाङ्गेनानङ्गेनामुक्ती क्षिपती दृष्टि-मेव शरौघवृष्टिं इषुबाणव्रातवर्षणं तनोति। तन्वत्वस्तु मृदुः स्वभावात्, न तु कुसुममयत्वात्। मुष्टिग्रहणार्हमध्या शातोदरी। न तु धनुर्लतात्वेन तथा श्रीमानपाङ्गो नेत्रान्तो, न त्वपगताङ्गोऽनङ्गः। मोहो वशीकरणं, न तु मूर्च्छा ॥२८॥

आघूर्णितं पक्ष्मलमक्षिपद्मं प्रांशुद्युतिश्वैत्यजितामृतांशु।
अस्या इवास्याश्चलदिन्द्रनीलगोलामलश्यामलतारतारम् ॥२९॥

अस्या अक्षियुग्ममस्या इव। कीदृक्? आ ईषत् घूर्णितं भ्रान्तम्। पक्ष्मलं पक्ष्मा-न्वितं प्रांशुद्युति स्फारद्युति स्फारकान्ति श्वैत्यजितामृतांशु सितिमतिरस्कृतसुधाकरम्। तथा चलत्याविन्द्रनीलगोलवत् अमले सुच्छाये नीले कृष्णे तारे कनीनिके यस्य तत् तथा। अनन्वयोपमेयम् ॥२९॥

कर्णोत्पलेनापि मुखं सनाथं लभेत नेत्रद्युतिनिर्जितेन।
यद्येतदीयेन ततः कृतार्था स्वचक्षुषी किं कुरुते कुरङ्गी ॥३०॥

मृगी यदि चेद् भैमीसंबन्धिना कर्णोत्पलेनापि सनाथं सस्वामिकं मुखं लभेत, तदा कृतार्था सती निजनयनद्वयं किं कुरुते। अपि तु, तस्यास्ताभ्यां किमपि नैव कार्यमित्यर्थः। कीदृशेन? लोचनकान्तितिरस्कृतेन, नयनकान्तितिरस्कृतेन। एतेनास्या नयनयोर्मृगीनेत्राभ्यां सममुपमानोपमेयभावो दूरे निरस्तः। अथ च किं कुरुते किङ्करी कुरुत इत्यर्थान्तरम् ॥३०॥

त्वचः समुत्तार्य दलानि रीत्या मोचत्वचः पञ्चषपाटनायाम्।
सारैर्गृहीतैर्विधिरुत्पलौघादस्याभभूदीक्षणरूपशिल्पी ॥३१॥

मोचत्वचः कद-[147 b]-लीवल्कलस्य रीत्या युक्त्या दलान्येव त्वचो वल्क-लानि समुत्तार्यापनीय पञ्चषपाटनायां सत्याम्। उत्पलानामोघाद् वनाद् गृहीतैः सारैरस्यां विषये विधिरीक्षणरूपशिल्पी नयनसौन्दर्यविज्ञानकौशली जातः। पञ्च-षड् वा परिमाणमेषां पञ्चषाणि तेषां पाटना दारणमुत्तारणाय विश्लेषणम् ॥३१॥

1. ४ om. स्फारद्युति. 2. ४ om. लोचनकान्तितिरस्कृतेन.

चकोरनेत्रेणदृगुत्पलानां निमेषयन्त्रेण किमेष कृष्टः।
सारः सुधोद्गारमयः प्रयत्नैर्विधातुमेतन्नयने विधातुः ॥३२॥

चकोरनेत्रे चैणदृशौ चोत्पलानि चैषाम्। सुधोद्गारमयः पीयूषोच्छलनरूपः सारः स्थिरांशः किमेष एतादृश एतस्या नयने विधातुं विधातुः प्रयत्नैः कृष्टः। केन कृत्वा? निमेष एव यन्त्रो वस्त्रविशेषस्तेन। तत्र नये निमिषोऽस्त्येव। स नूनं यन्त्रः। अन्येषामपि केषांचिदङ्कोल्लबीजादीनां सारस्तैलादिमयो यन्त्रेण पातालादियुक्तिनिर्मितेन कृष्यते। अयं तु निमेषरूप एव यन्त्रः। प्रयत्नानामेव कर्तृत्वमत्र विवक्षितम्। 'चकोरनेत्रेण-दृग्' इत्यत्र चकोरैणदृगिति वक्तव्ये नेत्रशब्दस्य पृथगुपादानं नेत्रदृशोर्लघुत्वपृथुत्व-कृतसंस्थानभेदात् ॥३२॥

ऋणीकृता किं हरिणीभिरासीदस्याः सकाशान्नयनद्वयश्रीः।
भूयोगुणेयं सकला बलाधत्ताभ्योऽनयाऽलभ्यत बिभ्यतीभ्यः ॥३३॥

चकितहरिणाक्षी वामाक्षीयमिति कविराक्षेपातिशयपक्षमाश्रित्य भङ्ग्यन्तरेणाह। हरिणी-भिर्नयनद्वयस्य श्री शोभा किमस्याः सकाशाद् ऋणीकृताऽऽसीत्। कथमेवं संशय इत्याह। यस्मात् कारणादियं, [1]नयनद्वयश्रीः कलान्तरैर्व्याजैः सहिता। सकला कलान्तरैः सहिता। भूयो गुणा, [2]बहुगुणा, द्विगुणा, त्रिगुणा, चतुर्गुणा वा समधिकवर्तना ताभ्यो बिभ्य-तीभ्यः सकाशाद् बलादगृह्यत [3]अनया दमयन्त्या लब्धा। अन्योऽपि कोऽपि यदि कस्मादपि बलवतो धनिनः सकाशाद्द्रव्यं, कनकपट्टकादिकं ऋणीकरोत्युद्धाररीत्या गृह्णाति। तदा स तस्माद् बिभ्यतः सकाशात् तो कलान्तरेण सह बहुगुणां त्रिगुणां चतुर्गुणां वा बलाद् गृह्णाति। तच्चतस्तु सकला सम्पूर्णा बहवो गुणाश्चञ्चलत्वादयो धर्मा यत्र स तथा। बिभ्यतीनां पृषतीनां नयनयोरलीव श्रीः समुन्मीलतीति तद्विशेषणम्। अनृणमृणं कृता, ऋणीकृता। 'स्यादृणं पर्युदञ्चनम्'। गुणो वर्तनविशेषो धर्मविशेषश्च। तस्या इति पञ्चम्यैव सकाशशब्दे गतार्थे तत्प्रयोगः स्वरूपकथनमात्रसमाश्रयणेन ॥३३॥

दृशौ किमस्याश्चपलस्वभावे न दूरमाक्रम्य मिथो मिलेताम्।
न चेत्कृतः स्यादनयोः प्रयाणे विघ्नः श्रवःकूपनिपातभीत्या ॥३४॥

अस्याश्चपलस्वभावे चञ्चलप्र-[149.a]-कृती दृशौ दूरमतिशयेनाक्रम्य प्राप्य, पीडयित्वा किं परस्परं न मिलेतां, न [4]समगंस्येताम्। यद्यनयोः प्रस्थाने सति,

1. om. B. नयन----सहित्ता। 2. B. om. बहुगुणा----वा, 3. B. om. अनया दमयन्त्या-
4. B. समगंस्यताम्।

भावसी एव कूपौ अवसोर्वा कूपौ विवरे तत्र निपातो निपतनं ततो भीतिस्तया विघ्नः प्रत्यूहः कुतो न स्यात् ॥३४॥

केदारभाजा शिशिरप्रवेशात्पुण्याय मन्ये मृतमुत्पलिन्या।
जाता यतस्तत्कुसुमेक्षणेयं यतश्च तत्कोरकदृक्चकोरः ॥३५॥

मन्ये केदारं नाम प्रसिद्धं देवं भजतीति केदारभाक्। तयैवंविधयोत्पलिन्या। शिशिर-प्रवेशात् हिमावगाहनात् पुण्याय सुकृताय मृतं मरणं कृतम्। यतः कारणादियं तस्याः कुसुममेवेक्षणे यस्याः सैवंभूता भूता। यतश्च कारणाच्चकोराख्यः पक्षी, तस्याः कोरको दृक् यस्य स तादृग्भूतो भूतः। न ह्येतद् वस्तुद्वयस्वरूपमेतस्या एतद् द्वयेन तथाविधं सुकृतं विना लभ्यते। तत्त्वतस्तु केदारो जलपूर्णः क्षेत्रभेदः शिशिरस्तुषारसमयः। प्रवेश आगमः। तदा पद्मिन्यो नश्यन्तीति प्रत्यक्षमेव। चकोरदृशोः कोरकत्वरूपणेन तदीयेक्षणयोः कुसुमरूपणविषयीकृतयोः प्रकर्षः प्रदर्शितः। केदारदर्शनपुरःसरहिमाव-गाहनमरणस्य महिमा तु स्वर्गादिप्राप्तिकृत् प्रसिद्ध एव ॥३५॥

नासादसीया तिलपुष्पतूणं जगत्त्रयव्यस्तशरत्रयस्य।
श्वासानिलामोदभरानुमेया दधद्द्विबाणीं कुसुमायुधस्य ॥३६॥

अमुष्याः[1] दमयन्त्याः इयमदसीया नासा निबद्धोऽस्ति। ननु द्विबाणी तत्रादृश्यत इत्याह। श्वासानिलस्यामोदः सौरभं, तस्य भर आधिक्यं तेनानुमेयाऽभ्यूह्या। नासा तावत् तिलपुष्परूपत्वात् पुष्पशरशरधित्वेन सम्भाविता। कुसुमसौरभभरेण च तदन्तर्वर्तिपुष्पशरशरद्वयसम्भावनम् ॥३६॥

बन्धूकबन्धूभवदेतदस्या मुखेन्दुनानेन सहोज्जिहानाम्।
रागश्रिया शैशवयौवनीयां स्वमाह सन्ध्यामधरोष्ठलेखा ॥३७॥

अस्या अधोवर्तमानस्यौष्ठस्य लेखा[2] एतदुपलभ्यमानं बन्धूकबन्धूभवद् बन्धुजीव-कुसुमसादृश्यं प्राप्नुवत्। स्वमात्मानं सन्ध्यामाह। कया? रागश्रिया करणभूतया विशेषणे वा तृतीयेयम्। कीदृशीम्? शैशवयौवनयोरियं शैशवयौवनीया, ताम्। किञ्चानेन वदनशशिना समम् उदयन्तीम्। सन्ध्या हि रागश्रिया लौहित्यसम्पदा विशिष्टा भवति। चन्द्रेण सह चोज्जिहीते। बन्धूकबन्धुरिव चास्यात्मा भवति। अत्र चैतत् सर्वं प्रत्यक्षमेव। स्वशब्द आत्मपर्यायोऽपि प्रायेण नपुंसक एव। सर्वनामपाठस्तु

---

1. Ś. om. अमुष्याः --- अदसीया. 2. Ś. लेखाँषा.

तद्विधिप्राप्तेः। यथा युष्मदस्मदोरलिङ्गयोरपि सर्वनाम्नि पाठोऽकप्रत्ययादिकार्याय। अन्यत् तु सहृदयैर्बहुदृश्याभिर्विमृश्यम्। अबन्धूकबन्धुर्बन्धूकबन्धुर्भवत् बन्धूकबन्धुर्भवत्॥३७॥

अस्या मुखेन्दा-[148.6]-वधरः सुधाभूर्बिम्बस्य युक्तः प्रतिबिम्ब एषः।
तस्याथ वा श्रीर्द्रुमभाजि देशे सम्भाव्यमानास्य तु विद्रुमे सा ॥३८॥

अस्या वदनचन्द्रे (न्द्र) एषोऽधरो रदनच्छदः सुधाभूरमृतोद्भूतो बिम्बस्य मूर्तिः (र्तेः) प्रतिबिम्बः प्रतिमूर्तिर्युक्त उपपत्तिमानेव। इन्दौ हि सुधा प्रसिद्धा। सा च द्रवरूपा। द्रवे च बिम्बः प्रतिबिम्बित एव। अथ च सुधायाऽमृतस्य भूराधारो बिम्बस्य फलपदार्थविशेषस्य प्रतिबिम्बो विरोधी प्रतिपक्षभूतः प्रतिबिम्बाख्यः पदार्थो युक्त एव। बिम्बफले लौहित्यं प्रसिद्धम्। अत्र तु प्रत्यक्षमेवेति प्रतिबिम्बत्वम्। अथवा नैतद्युक्तम्। यतस्तस्य बिम्बाख्यस्य फलस्य श्रीः सम्पत् द्रुमभाजि वृक्षवति देशे सम्भाव्यमाना सम्भवन्ती। अस्य त्वधररूपस्य विद्रुमे द्रुमरहितेऽपि देशे सम्भाव्यमानाऽस्तीति संबन्धः। छलेनायमर्थः। तत्त्वतस्तु श्रीः शोभा, विद्रुमे प्रवाले। फलवाचकबिम्बस्य नपुंसकत्वात् प्रतिबिम्बस्यापि नपुंसकत्वे प्राप्ते पुंसि निर्देशः पदार्थशब्दस्य संनिधानात्। अथवा प्रतिपक्षभूतो बिम्बस्य प्रतिबिम्ब इति व्याख्येयम्। छलोक्तिर्भूयसी व्याप्तिरत्र। प्रतिफलनपक्षे सुधाभूः प्रतिबिम्बोऽधरोऽधोभागे वर्तमान इति वा॥३८॥

म्लानेऽतिरागादिदमेव बिम्बं बिम्बस्य च व्यक्तमितोऽधरत्वम्।
द्वयोर्विशेषावगमाक्षमाणां नाम्नि भ्रमोऽभूदनयोर्जनानाम् ॥३९॥

अतिरागाद् हेतोरिदमेवोपलभ्यमानं बिम्बं रागितया ख्यातं बिम्बाख्यं फलं म्लाने। इतः सकाशाद् (-शा-) बिम्बस्य फलस्याधरत्वं हीनत्वमतिरागाद् व्यक्तमेव प्रत्यक्षमेवास्ते। तर्हि कथमधराख्या तस्य च बिम्बाभिधेत्याह। जनानां सामान्यलोकानां द्वयोर्नाम्नि भ्रमोऽभूत् भ्रान्तिर्जाता। यतो विशेषस्य विभेदस्यावगमे ज्ञानेऽक्षमाणामशक्तानां विशेषावगमोऽर्थाद् द्वयोरेव। न हि जनोऽवान्तरविशेषविवेचनक्षमः। स ह्यापातमात्रानुभूतवस्तुस्वरूपव्यवहारी ॥३९॥

मध्योपकण्ठावधरोष्ठभागौ भातः किमप्युच्छ्वसितौ यदस्याः।
तत्स्वप्नसम्भोगवितीर्णदन्तदंशेन किं वा न मयापराद्धम् ॥४०॥

अस्या मध्यस्योपकण्ठौ निकटावधरौष्ठस्य भागावंशौ यत्किमपि मनागिवोच्छ्वसितौ समुन्नतौ भातः शोभेते। तत् किं मया नापराद्धम्। स ममापराधो न, अपि तु जाने

स मम एव शेषः। कीदृशेन ? स्वप्नसम्भोगे वितीर्णो दन्तदंशो येन स, तथा, तेन।
सरभससुरतरसदृत्तदन्तदंशवशादधरसमीपदेशयो- [१५५ a] -रुच्छूनत्वे धरत एव॥७०॥

विधाविदर्भेन्द्रसुताधरोष्ठे नृत्यन्ति कत्यन्तरदेशभाजः।
इतीव रेखाभिरपश्रमस्ताः सङ्ख्यातवान् कौतुकवान्विधाता ॥७१॥

भैम्या अधरोष्ठे अन्तरदेशभाजो मध्यस्थानस्थाः। कतिसङ्ख्याका विधा नृत्यन्ति स्फुरन्तीतीव खेदरहितः। कौतुकी विधिस्तत्रस्थाभां रेखाभिः सङ्ख्यातवान्, गणयति स्म। अधरोष्ठः सन्नारीणां रेखावान् पूज्यः। 'अन्तरलाभभाजः' इति मूलभवः पाठः। अन्तर- -मवकाशमेव लाभमधिकफलं भजन्तीत्यन्तरलाभभाज इति च व्याख्येयम्। लाभा- -दवश्यं नृत्यति, न हि तत्रान्येषामवकाशोऽस्ति। अतस्तदवाप्तेरधिकलरलाभान्नर्तनम्॥७१॥

संभुज्यमानाद्य मया निशान्ते स्वप्नेऽनुभूता मधुराधरेयम्।
असीमलावण्यरदच्छदेत्थं कथं मयैव प्रतिपद्यते वा ॥७२॥

अद्य स्वप्नदशायां निशान्ते रात्र्यवसाने मया संभुज्यमाना सम्भोगविषयतां नीय- -माना सती मधुराधरा माधुर्यगुणाधिष्ठितोष्ठीयमनुभूतोपलब्धा वा। अथवा मयैव तदवस्थेनेत्थमनुभूयमानेन प्रकारेणासीमलावण्यरदच्छदा कथं कस्माल्लभ्यते। असीम निरवधि लावण्यं लवणत्वं यत्र तावेवंभूतौ रदनच्छदावोष्ठौ यस्याः सा तथा। इदानीमेव मया मधुरोष्ठी सम्यगनुभूता। इदानीमेव कुतो लवणोष्ठीयं जातेत्यर्थः। तत्त्वतस्तु लावण्यं सौन्दर्यं छायाविशेषः। निशान्तेऽरुणोदयवेलायां किल स्वप्ने यद् वस्तु यथाऽनुभूयते तद्दशाद्यभ्यन्तरे तथैव लभ्यते। निशान्तमन्तःपुरमपि॥७२॥

यदि प्रसादीकुरुते सुधांशोरेषा सहस्रांशमपि स्मितस्य।
तत्कौमुदीनां कुरुते तमेव निमिच्छय देवः सफलं स जन्म ॥७३॥

एषा निजस्मितस्य सहस्रांशमपि यदि सुधांशोः प्रसादीकुरुते, प्रीतिदायीकरोति। तत् ततः स देवः सुधांशुः निजकौमुदीनां जन्म प्रसूतिमङ्कुरितत्वं तदेवास्याः स्मितं निमिच्छ्य निमिच्छनविषयतां नीत्वा सफलं कुरुते। देव इति साभिप्रायम्। देवा हि सर्वेषां पूज्याः। अयं तु देवोऽप्यस्य निमिच्छनं करोति। निमिच्छेति मिच्छ उत्क्लेशे। निमिच्छनमु- -परि भ्राम्य दूरतः क्षेपणं लोकतः प्रसिद्धम् ॥७३॥

चन्द्राधिकैतन्मुखचन्द्रिकाणां दरायितं तत्किरणाद् घनानाम्।
पुरःसरस्रस्तपृषद्द्वितीयं रदावलिद्वन्द्वति बिन्दुवृन्दम् ॥७४॥

पुरःसराण्यग्रे सराणि अस्त्राणि च्युतानि यानि पृषन्ति बिन्दवस्तानि द्वितीयानि यस्य तदेवंभूतं बिन्दूनां वृन्दं निकुरम्बं दरायितं छिद्रितं किञ्चित् विश्लिष्टं रदावलि द्वन्द्वमिति दन्तपङ्क्तियुगलमिवाचरति। केषां बिन्दुवृन्दमित्याह। चन्द्राधिकैतन्मुख-[।४१८]-चन्द्रिकाणां घनानां मेघानाम्। मेघानामेवंरूपं बिन्दुवृन्दं भवत्येव। कस्माच्चन्द्रिकाणां घनत्वमित्याह। तस्य चन्द्रस्य किरणाद् रश्मिभ्यः। चन्द्रस्य ज्योत्स्ना किरणयोर्भेदोऽस्ति। शब्दच्छलमात्रेणायमर्थः। तत्त्वतस्तु रश्मिसंपर्काद् घनानां सान्द्राणामिति विशेषणमात्रम्। प्रथमपक्षे तु रूपणम्। चन्द्रात् प्रसिद्धादधिकोऽयमेतस्या मुखमेव चन्द्रस्तस्य चन्द्रिकाः कौमुदीनिचयः दरायितं भीतमुच्यते। तच्च भयहेतोर्विश्लिष्यत्येव। अत्र तूपचाराद् विभिन्नभावः॥४४॥

सेयं मदेतद्विरहार्तिमूर्च्छातमीविभातस्य विभाति सन्ध्या।
महेन्द्रकाष्ठागतरागकर्त्री द्विजैरमीभिः समुपास्यमाना ॥४५॥

सेयं सन्ध्या वर्तते। कस्य? ममैतस्या विरहेण याऽर्तिः पीडा, तथा या मूर्च्छा-ऽऽन्ध्यं सैव तमी रात्रिः, तस्या विभा, तस्यावसानस्य प्रातःसन्ध्येयम्। इदानीं तद् धर्ममाह। महेन्द्रकाष्ठा प्राची दिक्, तत्र गतस्य रागस्य लौहित्यस्य कर्त्री। तथाऽमीभिर्द्विजैर्ब्राह्मणैः समुपास्यमानोपस्थीयमाना। प्रातःसन्ध्या हि प्राचीं दिशं लोहितयति, द्विजैश्चोपास्यते। तत्त्वतस्तु महेन्द्रस्य दिवस्पतेः काष्ठागतस्य परम-कोटिप्राप्तस्य प्रेमरससंसर्गस्य विधात्री। द्विजैर्दन्तैर्यथावत् सुश्लिष्टत्वेनोपास्यमाना समाश्रीयमाणा। विरहार्तिमूर्च्छायाऽवसानं तु दर्शनकृतसंयोगात् ॥४५॥

रात्रौ द्विजानामिह राजदन्ताः संबिभ्रति श्रोत्रियविभ्रमं यत्।
उद्वेगरागादिमृजावदातास्चत्वार एते तदवैमि मुक्ताः ॥४६॥

इह द्विजानां रात्रौ ब्राह्मणानां पङ्क्तौ। यत्कारणाद् राजदन्ता उद्वेगेन वैराग्येण रागो विषयाभिलाषस्तमत्ति नाशयतीति सा चासौ मृजा स्नानम्। तयावदाता बाह्याभ्यन्तरपूताः सन्तः श्रोत्रियविभ्रमं छान्दसविलासं संबिभ्रति, सम्यग् धारयन्ति। तत्कारणादवैमि जानाम्येते चत्वारो मुक्तिं गता एव। बलवत्-कारणदर्शनाद् भाविनि भूतवदुपचारः। यथा जाता चेद् वृष्टिः सम्पन्नाः शालयः।
तत्त्वतस्तु द्विजानां रात्रौ दन्तानामालौ। श्रोत्रियविभ्रमो नैर्मल्यायात्तादुपचारात्। उद्वेगं (गः) पूगफलम्। तस्य रागः। आदिशब्दाद् भोजनान्नमलादि मार्जनात् प्रक्षालनादवदाता विशदाः। अत एवैते चत्वारो मुक्ता अवैमि, मुक्ताफलानि जाने।

श्रोत्रियश्चासौ विप्रश्च श्रोत्रियविप्रः। उपचारात् शुक्लः पक्षी हंसः। तस्य विभ्रमे भ्रान्ति-विशारदत्वात् हंसोपमेत्यर्थः। राजदन्ताश्चत्वारो मध्यस्थाः ॥७६॥

शिरीषकोषादपि कोमलाया वेधा विधायाङ्गमशेषमस्याः।
प्राप्तप्रकर्षः सुकुमारसर्गे समापयद्वाचि मृदुत्वमुद्राम् ॥७७॥

शिरीषं नाम कुसुमं, [150·a] तस्य कोषो गर्भस्तस्मादपि मृदुलाया अस्या--श्चाशेषमङ्गं विधाय सुकुमारसर्गे म्रदीयसि विनिर्माणे प्राप्तप्रकर्षो लब्धनैपुणः सन्, वेधा मृदुत्वमुद्रां मार्दवावधिं वाचि पूर्णतामनयत्। एतदन्या म्रदीयसितरा धातु--र्विनिर्मितिर्नास्तीति तात्पर्यार्थः ॥७७॥

प्रसूनबाणाद्वयवादिनी सा काचिद्द्विजेनोपनिषत्पिकेन।
अस्याः किमास्यद्विजराजतो वा नाधीयते भैक्ष्यभुजा तरुभ्यः ॥७८॥

पिकेन द्विजेन ब्राह्मणेन सा काचिदतितरामनिर्वचनीया प्रसूनबाणाऽद्वयवादिनी कामैक्यप्रतिपादिका। उपनिषद्-रहस्यभूता विद्या किं वा नाधीयते। अपि तु पठ्यत एव। कस्मात्? अस्या आस्यमेव द्विजराजो ब्राह्मणाग्रणीस्तस्मात्। कीदृशेन? तरुभ्यः सकाशाद् भैक्ष्यभुजा। पिको हि प्रतितरु फलानि समादत्ते। तत्त्वतस्तु पिको द्विजः पक्षी। द्विजराजश्चन्द्रः। अन्येनापि द्विजेन ब्रह्माद्वयवादिनी सा तादृश्युपनिषद्ज्ञेभ्यो गृहस्थेभ्यो लब्धेन भैक्षेण वर्तयित्वा कस्मादपि वेदविदो ब्राह्मणवर्यात् विधिवदधीयते। अनेन वाक्यार्थेन विचार्यमाणेन तस्या वाचो धुरीणा माधुरी स्मरोद्दीपनं च द्योत्यते। वेदान्तरहस्यमुपनिषत्। भैक्ष्यं भिक्षासमूहः ॥७८॥

पद्माङ्कसद्मानमवेक्ष्य लक्ष्मीमेकस्य विष्णोः श्रयणात् सपत्नीम्।
आस्येन्दुमस्या भजते जिताब्जं सरस्वती तद्विजिगीषया किम् ॥७९॥

एकस्य विष्णोः श्रयणाद् भजनाद्धेतोः सपत्नीं प्रतिपक्षभूतां लक्ष्मीं कमलमध्य--निवासिनीं दृष्ट्वा वागधिष्ठात्री तिरस्कृतपद्ममस्या मुखचन्द्रं तस्या लक्ष्म्या विजेतु--मिच्छया किं भजते। अस्यापि समानपतिकां कामिनीमुत्कृष्टवेश्मकृतस्थितिमवलोक्य तद् विजयाय ततोऽप्यधिकतरगुणं वेश्माधिवसति ॥७९॥

कण्ठे वसन्ती चतुरा यदस्याः सरस्वती वादयते विपञ्चीम्।
तदेव वाग्भूय मुखे मृगाक्ष्याः श्रोतुः श्रुतौ याति सुधारसत्वम् ॥८०॥

अस्याः मृगाक्ष्याः कण्ठे वसन्ती सती, विरुद्धा भारती यद्विपञ्चीं वादयते, सप्ततन्त्रिकां वीणां निक्वाणयति। तदेव तादृशं विपञ्चीवादनं मुखेऽर्थादस्या एव वाग्भूयवचनतया परिणमय्य श्रोतुः श्रुतावाकर्णयितुः कर्णेऽमृतस्वादुतां याति। चतुरा सरस्वत्यस्याः कण्ठे वसतीति। अनेनास्या वाग्वैदग्ध्यमौग्ध्यम्। वाग्देवतायाश्च वीणावादननैपुणं प्रतिपाद्यते। अस्या इति प्रकृतेऽपि मृगाक्ष्या इति मुख्यतया मुखेन सह संबध्यमानेन विशेषणेन सविभ्रमवचनचातुरी च। माधुर्यधुर्यत्वं तु वाचस्तात्पर्यवृत्तितोऽवगम्यते ॥५०॥

विलो-[15०.8]-कितास्या मुखमुन्नमय्य किं वेधसेयं सुषमासमाप्तौ।

धृत्युद्भवा यच्चिबुके चकास्ति निम्ने मनाङ्गुलियन्त्रणेव (णैव) ॥५१॥

परशोभापरिपूर्तौ सत्यामस्या मुखमुत्क्षिप्य विधिना किं दृष्टा भवेत्। यत् कारणात् चिबुके मुखाधोभागांशे मनाग् निम्ने किञ्चिद्गम्भीरे धृत्युद्भवा ग्रहणजाऽङ्गुलीनां यन्त्रणा विष्कम्भमेव चकास्ति। भावानयने द्रव्यानयनमिति न्यायाद् यन्त्रणात्र तदुक्तं स्थानम् ॥५१॥

प्रियामुखीभूय सुखी सुधांशुर्जयत्यसौ राहुभयव्ययेन।

इमां दधाराधरबिम्बलीलां तस्यैव बालं करचक्रवालम् ॥५२॥

प्रियाया अमुखं मुखं भूत्वा प्रियामुखीभूय सैंहिकेयभयाभावेन सुखी भृशं निर्वृत सन् चन्द्रस्तिष्ठति। तस्यैव प्रौढं रश्मिमण्डलिमामेता दशीमधरबिम्बलीलां बिम्बोष्ठविभ्रमं बभार। बालस्य चन्द्रमसो लौहित्यं प्रसिद्धम् ॥५२॥

अस्या मुखस्यास्तु न पौर्णमास्यं पूर्णस्य जित्वा महिमा हिमांशुम्।

भ्रूलक्ष्मखण्डं दधदर्धमिन्दुर्भालस्तृतीयः खलु यस्य भागः ॥५३॥

पौर्णमास्यं पूर्णिमायां भवं हिमांशुं जित्वा पूर्णस्य सकलगुणयुक्तस्यास्या-ऽऽस्यस्य महिमा महत्त्वं नास्तु। अपि तु, महाप्रमाणत्वमस्य युक्तमेव। अत्र हेतुमाह। खलु यस्माद् यस्यास्यस्य तृतीयो भागो भालमर्धमिन्दुः समार्धभागश्चन्द्रः। यतः किं कुर्वन्। भ्रुवावेव लक्ष्मखण्डं चिन्हसकलं दधत्। एतेनास्या मुखं चन्द्राद्ध्यर्धम्। एवं च महिमाप्रमाणाधिक्यं युक्तमेव। तत्त्वतस्तु पूर्णस्य यथावत् प्रमाणवतः। महिमा तु गुणगौरवम्। पौर्णमास्यमित्यनेन चन्द्रस्य पूर्णत्वं, मुखस्य तु सूक्तोक्तमेव। द्वयोः पूर्णयोः स्पर्धा युक्तैव। अर्धं समेंऽशके नपुंसकम् ॥५३॥

व्यधत्त धाता मुखपद्ममस्याः सम्राजमम्भोजकुलेऽखिलेऽपि ।
सरोजराजौ सृजतोऽद्यसीयां नेत्राभिधावत्र एव सेवाम् ॥५४॥

अस्या मुखपद्मं धाता समस्तेऽपि कमलकुले चक्रवर्तिनं विहितवान्। अत एव नयननामानौ सरोजराजौ कूमलनरपती । अमुष्या अस्या मुखपद्मस्येथमदसीया ताम् । सेवां सृजतो विधिवत् कुरुतः। राजानौ हि राजराजस्य सम्यक् सेवां कुर्वन्ति॥५४॥

दिवारजन्यो रविसोमभीते चन्द्राम्बुजे निक्षिपतः स्वलक्ष्मीम् ।
आस्ये यदास्या न तदा तयोः श्रीरेकश्रियेदं तु कदा न कान्तम् ॥५५॥

अहोरात्रयोः सूर्यसोमाभ्यां सकाशाद् भीते यथासङ्ख्यमिन्दुपद्मे यस्मिन् काले निजश्रियमस्या मुखे स्थापनिकीकुरुतस्तदा तयोर्न श्रीः। [151.a] पुनरिदमस्या आस्यमेकश्रियाऽभिन्नलक्ष्म्या कृत्वा कदा न कान्तमपि तु सर्वकालमुज्ज्वलमेव। चन्द्रकमलश्रियोरेवान्तरविशेषेऽपि जातिमात्राश्रयणेनैक्यम् । कालिदासादिभिरप्यभेद एव विवक्षितः। तथा च- "चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीम-भिख्याम् । उमामुखं तु प्रतिपद्य लोलाद्विसंश्रयां प्रीतिमवाप लक्ष्मीः" इत्यादि ॥५५॥

अस्या मुखश्रीप्रतिबिम्बमेव जलाच्च तातान्मुकुराच्च मित्रात् ।
अभ्यर्थ्य धत्तः खलु पद्मचन्द्रौ विभूषणं याचितकं कदाचित् ॥५६॥

अस्या मुखस्य श्रियः प्रतिफलनमेव निःसन्देहं जलाच्च पितुरादर्शाच्च सुहृदे याचित्वा कमलेन्दू याचितकं यान्चया प्राप्तं कदाचिदलङ्करणं कलयतः। पद्मस्य जलं तातो जन्महेतुत्वात् । चन्द्रस्य मुकुरो मित्रं मण्डलस्थाने कृतसादृश्यात् श्रीवर्णनाच्च चन्द्रस्याखण्डमण्डलत्वमायातम् । न हि खण्डे तत्र श्रीसद्भावः। अस्ति चेत् प्रायो न वर्ण्यते ॥५६॥

अर्काय पत्ये खलु तिष्ठमाना भृङ्गैर्मितामक्षिभिरम्बुकेलौ ।
भैमीमुखस्य श्रियमम्बुजिन्यो याचन्ति विस्तारितपद्महस्ताः॥५७॥

नूनं पद्मिन्यः प्रसारितकमलकराः सत्यो दमयन्त्या वदनस्य लक्ष्मीमर्थयन्ते। कीदृशीम्? जलक्रीडावसरे भृङ्गैरेवाक्षिभिर्मिताम् । इयमियत्येतादृशी विद्यत इति परिच्छिन्नाम् । यतः किं कुर्वाणाः? सूर्याय भर्त्रे तिष्ठमानाः सानुरागमात्मानं तदर्थिनं प्रकाशयन्त्यः। दमयन्त्या जलकेलिकाले सकलेदृशसंविधानादित्थमुक्तिः। अन्यापि कुमारी कस्मैचिद्वराय तिष्ठमाना सती कस्याप्याभरणसम्पदं प्रसारितहस्ता

सती प्रार्थयते। प्रतिज्ञानिर्णयप्रकाशनेषु स्थेत्यात्मनेपदम् ॥५७॥

अस्या मुखेनैव विजित्य नित्यस्पर्धी मिलत्कुङ्कुमशेषभासा।

प्रसह्य चन्द्रः खलु बध्यमानः स्थाद्देव तिष्ठत्परिवेषपाशः ॥५८॥

नूनमस्या मुखेनैव, नान्येन। हठाद् बन्धं प्राप्यमाण एव सन् चन्द्रस्तिष्ठन् परिवेषपाशः स्यात्। यतः कीदृशः? नित्यस्पर्धी मुखेन तु मिलन्ती कुङ्कुममेव शेषभाः क्रोधच्छविर्यत्र तत्तथा। तेनैतत् कुङ्कुमं न भवति, क्रोधच्छविरेवेयम्। तिष्ठन् वर्तमानः परिवेष एव पाशो यत्र स तथा। स्पर्धा तु गुणादिसाम्याद् भवत्येव। परिवेषस्तु कदाचित्कश्चन्द्रे (न्द्रे) दृश्यत एव ॥५८॥

विधोर्विधिर्बिम्बशतानि लोपं लोपं कुहूरात्रिषु मासि मासि।

अभङ्गुरश्रीकमिमं किमस्या मुखेन्दुमस्थापयदेकशेषम् ॥५९॥

विधिश्चन्द्रस्य बहूनि मण्डलानि प्रतिमासममावास्यारा-[ड।ऽ।]-त्रिषु लुप्त्वा लुप्त्वा किं स्थिरलक्ष्मीकमस्या वदनचन्द्रमेकशेषमस्थापयत्। रूपे रूपं प्रविष्टम्। सरूपाणामेकशेषः इति व्याकरणे प्रसिद्धमेव। तत्र समानानां रूपाणां मध्ये लिपि-क्रमेण विशिष्टं लेख्यं भवति तदवशेष्य रक्ष्यते। अन्यानि सर्वाणि लुप्यन्ते। लोपं लोपमिति णमुल् ॥५९॥

कपोलपत्रान्मकरात्सकेतुर्भ्रूभ्यां जिगीषुर्धनुषा जगन्ति।

इहावलम्ब्यास्ति [1]रतिर्मनोभू रज्यद्द्वयस्यो मधुनाधरेण ॥६०॥

मनोभूरस्याः कपोले वर्तमानात् पत्रात् तिलकरूपान्मकरात् [2]सध्वजः भ्रूभ्यामेव धनुषा जगन्ति जेतुमिच्छुः। इहास्यामवलम्ब्य लगित्वा। अस्तिरतिः अस्ति विद्य-माना रतिर्नाम जाया यस्य स, तथा। किञ्च, अधरेणोष्ठेनैव मधुना वसन्तेन कृत्वा रज्यद्वयस्यः प्रियमाणमित्रः। तच्चतस्तु रतिः सन्तोषः। मधुना मधुरूपेणैव। क्षौद्रगुणदर्शनात्। रज्यदिति रक्तत्वमेवाधरस्थम्। इहेत्यस्यालम्बनेनैव सम्बन्धः। अन्यत्र त्वस्या इति सम्बन्धः। पदं प्राकरणिकमेव। अन्यथा कष्टकल्पना स्यात्। अस्ति सत्त्वेऽव्ययम्। अधरेण स्वतो नीचेन वसन्तेन मित्रेणेत्ययमप्यर्थः स्थूलपक्षे ॥६०॥

वियोगबाष्पाञ्चितनेत्रपद्मच्छद्मार्पितोत्सर्गपयःप्रसूनौ।

कर्णौ किमस्या रतितत्पतिभ्यां निवेद्य पूर्वौ विधिशिल्पभीदृक् ॥६१॥

---

1. ०. रति॰. 2. ०१. marginalia सचिह्नः

अस्या ईदृशं विधेः शिल्पं विज्ञानं किमस्या एव कर्णावेव पूपौ भक्ष्यविशेषौ रतितत्पतिभ्यां सभार्याय मन्मथाय निवेद्य नैवेद्यं दत्त्वा। कीदृशौ? वियोगबाष्पेण विरहाश्रुजलेनाञ्चिते ये नेत्रे एव पद्मे, तयोरीदृशयोश्छद्मना व्याजेनार्पिते क्षिप्ते। उत्सर्गस्य संकल्पत्यागस्य पयःप्रसूने उदकपुष्पे यत्र तौ तथा। देवेभ्यो नैवेद्यं निवेद्य संकल्पोत्सर्गदानवाक्यपुरःसरं सोदकानि कुसुमानि तत्रार्प्यन्ते। ईदृश्यां सृष्टौ तु रतिकामयोरेव देवतयोरधिकारः। ईदृशमेव च नैवेद्यमत्राहम् ॥६१॥

इहाविशद्येन पथातिवक्रः शास्त्रौघनिष्यन्दसुधाप्रवाहः।

सोऽस्याः श्रवःपत्रयुगप्रणालीरेखेव धावत्यभिकर्णकूपम् ॥६२॥

अतिशयेन वक्रः कुटिलः शास्त्राणामोघस्य समूहस्य यो निष्यन्दो रसः सुधा-ऽमृतं तस्याः प्रवाहः प्रवर्तनं प्रवहणम्। येन पथा मार्गेणेह कर्णयोरविशत् प्रविष्टः। सैवास्याः श्रवसोर्ये पत्रे पत्राकारावंशौ श्रवसी एव पत्रयुगप्रणाल्यौ तयो रेखा पद्धतिरभिकर्णकूपं कर्णकूपं लक्षीकृत्य धावति, त्वरितं प्रयाति। शा-[152.व्]-स्त्रौघगतवक्रत्वभङ्गिः पूर्वं प्रदर्शितास्ति। अन्यस्तूदकप्रवाहः पलाशादिपत्रयुगप्रणालीद्वारा रेखारूपः कूपमभिधावन् प्रसिद्ध एव ॥६२॥

अस्या यदष्टादश संविभज्य विद्या श्रुती दध्रतुरर्धमर्धम्।

कर्णान्तरुत्कीर्णगभीरलेखः किं तस्य सङ्ख्यैव नवाङ्कः ॥६३॥

अस्याः श्रुती अष्टादशसङ्ख्याका विद्या अर्धार्धभागपुरःसरं सम्यग् भागं कृत्वा यत् किमपि दध्रतुः तस्यैवंविधधारणस्य सङ्ख्यावान् नवाङ्को न। स चायं कीदृशः? कर्णस्यान्तर्मध्ये उत्कीर्णा उल्लिखिता गभीरा लेखा राजी यस्य स तथा। कर्णान्तरिति पृथग् वा। स्त्रियामष्टादशविद्या चेदित्थं प्रायेण केचित् समञ्जसं न मन्यन्ते। अनिरुद्धवनितानां नृपकुमारीणां च केऽपि मन्यन्ते। नवसङ्ख्यावाचकोऽङ्को वर्णविशेषः। स च नागरिकलिपिगत एव बोद्धव्यः। तत्रैव वर्णनानुरूपस्य नवाङ्कस्य दृश्यमानत्वात्। लिप्यन्तरेषु हि तस्यान्यदेव संस्थानम् ॥६३॥

मन्येऽमुना कर्णलतामयेन पाशद्वयेन च्छिदुरेतरेण।

एकाकिपाशं वरुणं विजिग्ये ऽनङ्गीकृताया सतती रतीशः ॥६४॥

मन्येऽमुना दृश्यमानेन कर्णलतारूपेण च्छिदुरादितरेणाच्छिदुरेण पाशयो-र्द्वयेन रतीशोऽनङ्गीकृतायासततिः सन् वरुणं वशीचकार। यत एकाकिपाशम्।

एक एवैककी। एकाकी पाशो यस्य स तथा, तम्। द्विगुणायुधेन चैकायुधो बलवानपि जीयते। नाङ्गी-(अनङ्गी)-कृताऽस्वीकृताऽऽयासस्य श्रमस्य ततिः परम्परा येन स तथा ॥६४॥

आत्मैव तातस्य चतुर्भुजस्य जातश्चतुर्दोरुचितः स्मरोऽपि।

तच्चापयोः कर्णलते भ्रुवौ ज्ये (-वौर्ज्ये) वंशत्वगंशौ चिपिटौ किमस्याः ॥६५॥

चतुर्बाहोस्तातस्यैव मूर्तेरेवोचितो योग्यः, स्मरोऽपि चतुर्दोर्जात उत्पन्नः। "आत्मा वै जायते पुत्रः" इति श्रुतेः। चत्वारो दोषो बाहवो यस्य स चतुर्दोः। अस्या द्वयो-र्भुवोरेव तस्य स्मरस्य द्वयोश्चापयोर्द्वे कर्णलते चिपिटौ वंशत्वगंशौ किमु द्वे ज्ये, अपि तु तयोरेव मौर्वीद्वयमेतत्। चिपिटावतवर्तुलौ। वंशस्य त्वग् वंशत्वक्। तस्या अंशौ भागौ। एतच्च प्रसिद्धमेव वंशत्वगंशावेव ज्ये इत्यर्थः ॥६५॥

ग्रीवाद्भुतैवाबटुशोभितापि प्रसाधिता माणवकेन सेयम्।

आलिङ्ग्यतामप्यवलम्बमाना सुरूपताभागखिलोर्ध्वकाया ॥६६॥

सेयमीदृशी ग्रीवाऽद्भुतैव। अद्भुतहेतुत्वादद्भुता। सा केत्याह। या अबटुशोभिताऽपि माणवकेन प्रसाधितास्ति। आलिङ्ग्यतामवलम्बमानापि सुरूपताभागखिलोर्ध्वकाया वर्तते। [152. b] अयं हि विरोधः। याऽबटुना माणवकेन विप्रपुत्रकेण न शोभिता सा माणवकेन बटुना प्रसाधिताऽलङ्कृता कथं भवेत्। या च आलिङ्ग्यतामालिङ्ग्य-मानमृदङ्गभेदत्वमवलम्बमाना भजन्ती वर्तते। सा सुरूपतां भजतीति सुरूपताभाक्। एवंभूतोऽखिलः समग्र उर्ध्वकारव्यो मृदङ्गभेदो यस्याः सा तथा कथं भवेत्। न हि द्वौ विशेषावेकरूपतामापद्येते। अविरोधस्त्वेवम्। अबटुना कृकाटिकया शोभिता। माणवकेन हारेण प्रसाधिता। आलिङ्ग्यतामालिङ्गनयोग्यत्वम्। सुरूपताभागखिल उर्ध्वः कायो देहो यस्याः सा सुरूपताभागखिलोर्ध्वकाया। अत्र सेत्येतदपेक्षस्य यच्छब्दस्य न प्रश्लेषः। अबटुः कृकाटिका। अर्धहारो माणवकः। मृदङ्गमुरजाभेदाद् ङ्ग्यालिङ्ग्योर्ध्व-कास्त्रयः। प्रथमपक्षेऽपि द्वयं विरोधे, द्वितीयपक्षे तु समुच्चये ॥६६॥

कवित्वगानप्रियवादसत्यन्यस्या विधाता व्यधिताधिकण्ठम्।

रेखात्रयन्यासमिषादमीषां वासाय सोऽयं विबभाज सीमाः ॥६७॥

कवित्वं च गानं च प्रियवादश्च सत्यं चैतानि चत्वारि वेधाः कण्ठमधि न्यधित कण्ठे निहितवान्। सोऽयं धाता रेखात्रयन्यासस्य व्याजेनामीषां चतुर्णां वासाय सीमा

विबभाजाधारान् वैरितवान्। रेखात्रयन्यासेन चत्वारो भागा भवन्त्येव। अथ चेयं रेखात्रयोपलक्षिता ग्रीवा कम्बुग्रीवेत्युच्यते। सा च प्रायो दिव्यस्त्रीणामेव भवति। दमयन्तीसदृश्यस्तु नृपतनयास्तदवतारात् दिव्यस्त्रिय एव ॥६७॥

बाहू प्रियाया जयतां मृणालं द्वन्द्वे जयो नाम न विस्मयोऽस्मिन्।
उच्चैस्तु तच्चित्रममुष्य भङ्गस्यालोक्यते निर्व्यथनं यदन्तः ॥६८॥

प्रियाया द्वौ बाहू एकाकिमृणालं जयतामनुमतमेतत्। यतोऽस्मिन् द्वये जयो नाम मनाक् न विस्मयः। द्वाभ्यामेको जीयत एव। पुनस्तदतिशयेन चित्रम्। यदस्य भग्नस्य पराजितस्यान्तर्निर्व्यथनं मनोव्यथा नालोक्यते। पराजितस्यावश्यं मनःपीडा भवत्येव। तत्त्वतस्तु भग्नस्य त्रोटितस्यान्तर्मध्ये निर्व्यथनं छिद्रम्। मृणालस्य त्रोटितस्य मध्ये छिद्रालोकनं युक्तम्। तच्च न दृश्यतेऽतोऽतीव चित्रम् ॥६८॥

अजीयतावर्तशुभंयुनाभ्या दोर्भ्यां मृणालं किमु कोमलाभ्याम्।
निःसूत्रमास्ते घनपङ्कमृत्सु मूर्तासु नाकीर्तिषु तन्निमग्नम् ॥६९॥

आवर्तेन भ्रमेण शुभंयुः शुभान्विता नाभिर्यस्याः सा आवर्तशुभंयुनाभिस्तस्या आवर्त-शुभंयुनाभ्या अर्थाद् भैम्याः कोमलाभ्यां दोर्भ्यां किमु मृणालं जितं, को-[153-a]मलत्वेन पराभूतम्। तत् कारणाद् घनाश्च ताः पङ्करूपा मृदश्च तास्वेव मूर्तास्वकीर्तिषु निःसूत्रं निष्क्रियं सत्। मग्नं बुडितं न आस्ते। अपि तु तत एव हेतोरेवंभूतं तिष्ठति। तत्त्वतस्तु निःशेषेण सूत्राणि तन्तवो यत्र तन्निःसूत्रम्। प्रथमपक्षे सूत्रणं सूत्रम्। मन्त्रविशेषः। पङ्कमृदां कार्ष्ण्यादकीर्तित्वम्। अन्योऽपि बलीयान् कोमलाभ्यां जित एवमेव तिष्ठति ॥६९॥

रज्यन्नखस्याङ्गुलिपञ्चकस्य मिषाद्दशौ हिङ्गुणपद्मतूणे। (हिङ्गुल–)
हेमैकपुंखास्ति विशुद्धपर्वा प्रियाकरे पञ्चशरी स्मरस्य ॥७०॥

रज्यन्तो रक्तीभवन्तो नखा यत्र तस्याङ्गुलिनां पञ्चकस्य मिषात्। प्रियायाः पाणौ एव हिङ्गुलवर्णस्य पद्मस्य तूणे निषङ्गे स्मरस्य शरपञ्चकं वर्तते। कीदृशी?। हेमैकाः स्वर्णमयाः पुंखा गुणयो जनभागा यस्याः सा तथा। तथा विशेषेण शुद्धानि अविषमानि सुघटितानि पर्वाणि ग्रन्थयो यस्याः सा तथा। अङ्गुलीषु पर्वाणि ग्रन्थय एवंरूपाः सन्त्येव। पञ्चानां शराणां समाहारः पञ्चशरी ॥७०॥

अस्याः करस्पर्धनगर्धिनऋद्धिर्बालत्वमापत्खलु पल्लवो यः।

भूयोऽपि नामाधरसाम्यगर्वं कुर्वन् कथं वास्तु स न प्रवालः ॥७१॥

अस्याः करेण सह स्पर्धनगर्धिनी सं(घ)र्षलोलुपा ऋद्धिः श्रीर्यस्य स तथाभूतः सन् खलु नूनं पल्लवो बालत्वं शिशुत्वमाप। बाला एव हि मृत्काष्ठादिमयं तुरगमधिरुह्य राज्ञा सह स्पर्धन्ते। नाम भोः, भूयः पुनः। अधरेण सह यत् साम्यं तुल्यं, तदर्थं गर्वं कुर्वन्नभिमानमावहन्। कथं वा प्रकृष्टो बालो नास्तु। अपि त्वयमेवमाचरन्नचतुरः शिशुतर एव। तत्त्वतस्तु तस्य योगमनपेक्ष्य रूढित एव प्रवाह(ला)भिधा ॥७१॥

अस्यैव सर्गाय भवत्करस्य सरोजसृष्टिर्मम हस्तलेखः।

इत्याह धाता हरिणेक्षणायाँ किं हस्तलेखीकृतया तयाऽस्याम् ॥७२॥

ईदृशीनां सुदृशां करतले परमसौभाग्यादिसुखसूचकानि रेखापद्मानि भवन्ति, तानि कविर्भङ्ग्या वर्णयति। हे सुभगे! अस्यैव त्वत्पाणेर्निर्माणाय कमलसर्गो मम हस्तलेखोऽभूत्। मृगदृश्यस्यां तेन पद्मसृजनेन हस्तलेखीकृतेन किं धाता इति ब्रवीति। हस्ते लेखाः हस्तलेखाः। अहस्तलेखाः हस्तलेखाः कृता हस्तलेखीकृता, तयैवंरूपया सरोजसृष्ट्या। अथवाऽहस्तलेखो हस्तलेखः कृता, हस्तलेखीकृतेत्यपि। हस्तलेखः प्रसिद्धः ॥७२॥

किं नर्मदाया मम सेयमस्या दृश्याभितो बाहुलता मृणाली।

कुचौ किमुत्तस्थतुरन्तरीपे स्मरोष्मशुष्यत्तरबाल्यवारः ॥७३॥

अस्या मम नर्मदानाम्न्या नद्याः सेयमभि-[153-B]-तो दृश्या भुजवल्ली किं मृणाली। नद्यां तटद्वयेऽवश्यं मृणाललता भवेत्। किञ्च। अस्या एव नद्या अन्तरीपे किं कुचावुत्थितौ निर्गतौ। कीदृश्याः? । स्मरोष्मणा शुष्यत्तरमतिशयेन शुष्यद् बाल्यमेव वार्जलं यत्र तस्याः। शरच्चण्डचण्डरश्मितापसम्पत् संशुष्यज्जलायां नद्यामन्तरीपे निर्गच्छतः। तत्त्वतस्तु नर्म हास्यकेलिरसं ददातीति नर्मदा। कुचावनूधौ। अन्तरीपे विधेये। 'द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम्' ॥७३॥

तालं प्रभु स्यादनुकर्तुमेतावुत्थानसुस्थौ पतितं न तावत्।

परं च नाश्रित्य तरुं महान्तं कुचौ कृशाङ्ग्याः स्वत एव तुङ्गौ ॥७४॥

तालाख्यं फलं पतितं सत् तन्वङ्ग्याः कुचौ उत्थानेनोर्ध्वभावेन सुस्थौ सुखेन कृतस्थिती सन्तौ। अनुकर्तुं तुलयितुं न प्रभु न शक्तं स्यात्। परमन्यं च महान्तं

तरुं तरुप्रायं पुरुषं च नाश्रित्यावलम्ब्यानुकर्तुं न प्रभू। यतः एतौ स्वत आत्मन एव तुङ्गौ उच्चौ, न तु पराश्रयेण। तत्त्वतस्तु उत्थानमुदयोन्मुखत्वं, तेन सुस्थौ चारुनिवेशौ तुङ्गावुन्नतौ विधेते एव। परमतिशयेन महान्तं तरुं निम्नप्रसवहेतुं तालाख्यमेव। न हि ततोऽन्य उच्चतया महांस्तरुः। अन्योऽपि मल्लादिर्भूमिगतः सन्, उत्थानेनोर्ध्वस्थित्या सुस्थौ शोभनस्थितीप्रतिमल्लौ कृतप्रतीति कृतेन नानुकरोति। परं चान्यं पुरुषं महान्तमुच्चतरस्कन्धारोहणादिना कृत्वाऽऽश्रित्य नयतः। तौ स्वत एव पराश्रयं विनैव तुङ्गौ तालतरुवत् प्रलम्बौ ॥७७॥

एतत्कुचस्पर्धितया घटस्य ख्यातस्य शास्त्रेषु निदर्शनत्वम्।

तस्माच्च शिल्पान्मणिकादिकारी प्रसिद्धनामाजनि कुम्भकारः ॥७५॥

एतस्याः कुचौ ताभ्यां स्पर्धत इत्येवंशीलस्तस्य भावस्तया ख्यातस्य प्रसिद्धस्य घटस्य शास्त्रेषु न्यायवैशेषिकादिषु नित्यानित्यविचारे क्रियमाणे निदर्शनत्वं दृष्टान्तभावः प्रसिद्ध एव हि पदार्थो निदर्शनीक्रियते नाप्रसिद्धः। मणिकोऽलिञ्जरः, स आदिर्येषां तान् करोतीत्येवंशीलः पुरुषस्तस्मात्। घटलक्षणाच्छिल्पान्नाम्ना कृत्वा कुम्भकारः प्रसिद्धोऽजनि। मणिकादिमहाप्रमाणभाण्डकर्तृत्वेऽपि पुरुषः कुम्भकारनाम्ना प्रसिद्धो जात इत्यर्थः। कुम्भश्च घट एव। घटस्य हि दमयन्तीकुचाभ्यां सह विश्वविदितं स्पर्धमानस्य गुणकृतं महत्त्वं सिंहस्येव मणिकप्रभृतीनां तु प्रमाणकृतं गजानामिव। गुणगौरवमेव च श्लाघ्यं, न तु देहगौरवमिति प्रसिद्धमेव ॥७५॥

गुच्छालयस्वच्छतमोदबिन्दुवृन्दाभमुक्ताफलफेनिलाङ्के।

माणिक्यहीरस्य विदर्भसुभ्रूपयोधरे रोहति रो-[154-व]-हितश्रीः।

विदर्भसुभ्रूर्दमयन्ती तस्याः पयोधरे स्तने माणिकाख्यस्य हीरस्य रत्नविशेषस्य रोहितश्रीर्लोहितकान्तिः रोहत्यधितिष्ठति। कीदृशे? गुच्छो हारयष्टिभेदः स एवालयो यासां ता एवंभूताः स्वच्छतमा अतिस्वच्छाः। उदबिन्दुवृन्दाभा जलपृषन्निभा मुक्ताः स्थूलमौक्तिकानि। ता एव फलरूपत्वात् फलानि, तैः कृत्वा फेनिलः सञ्जातफेन सञ्जातफेन इवाङ्को मध्यो यस्य तस्मिन्। ईदृशि व्यतिकरे माणिक्यस्य लोहितश्रीरत्तिवाधिरोहति। अथ च। एवं फेनिलाङ्के पयोधरे मेघे रोहिताख्यस्य ऋज्वृजः शक्रधनुषः श्रीरधिरोहतीत्यर्थान्तरम्। एवं हि तस्य श्रीरत्तीव रोहति संबद्धा भवति। रोहिणी चासौ श्रीश्च रोहितश्रीः। पक्षे रोहितस्य लोके मत्स्याख्यया

प्रसिद्धस्य श्रीः शोइत्युत्कर्षं प्राप्नोति। इन्द्रायुधं शक्रधनुस्तदेव ऋजुरोहितं तच्च सद्योवृष्टिनिमित्तत्वादतीव शुभम् ॥७६॥

निःशङ्कसङ्कोचितपङ्कजोऽयमस्यामुदीतो मुखमिन्दुबिम्बः।
चित्रं तथापि स्तनकोकयुग्मं न स्तोकमप्यञ्चति विप्रयोगम् ॥७७॥

अस्यां विषये मुखमेव निर्भयनिमेषितसरसिजोऽयमिन्दुबिम्ब एव उदितोऽस्ति। आश्चर्यमेवमपि सति कुचचक्रवाकमिथुनं मनागपि विरहं न याति। चन्द्रोदये रात्रेः प्रवृत्तत्वात् तस्य सृष्टिक्रमायातो विरहो युक्तः। कमलसङ्कोचकारित्वान्मुखस्य चन्द्रत्वमायातम्। सङ्कोचस्त्वत्र गुणकृत एव, न रूपकृतः ॥७७॥

आभ्यां कुचाभ्यामिभकुम्भयोः श्रीरादीयतेऽसावनयोः क्व ताभ्याम्।
भयेन गोपायितमौक्तिकौ तौ प्रव्यक्तमुक्ताभरणाविमौ यत् ॥७८॥

आभ्यां प्रत्यक्षाभ्यां कुचाभ्यां गजमूर्ध(र्ध)पिण्डयोः संबन्धिनी श्रीरादीयते। नु पुनरनयोः कुचयोः संबन्धिनी ताभ्यामिभकुम्भाभ्यां क्वादीयते। अपि तु न क्वापीति लोकोक्तिरियम्। क्व स्थाने स्थित्वा गृह्यत इत्यादि युक्त्या। क्वेति सप्तम्यर्थः सङ्गतिमानन्नीयः। प्रतिश्लेयम्। अत्र हेतुमाह। यद्धतोस्ताविभकुम्भौ भयेनैव गुप्तीकृत-मौक्तिकौ। इमौ च कुचौ प्रकर्षेण व्यक्तं मुक्ताभरणं ययोस्तौ तथाविधौ। भयेन गोपायितमौक्तिकावित्यपि सम्भावनैव हेतुभूता। श्रीस्तत्त्वतः प्रमाणसंस्थान-कृतात्र, न तु धनधान्यादिविभवसम्पत्। बलवद्धरणभयेन चावश्यं वणिगादयो मौक्तिकानि गोपायन्ति ॥७८॥

कराग्रजाग्रच्छतकोटिरर्थी ययोरिमौ तौ तुलयेत्कुचौ चेत्।
सर्वं तदा श्रीफलमुन्मदिष्णु जातं वटीमप्यधुना न लब्धुम् ॥७९॥

श्रीफलं बिल्वीफलं (बिल्व-) कर्तृ ताविमौ कुचौ चेद्यदि तुलयेत् समानी-कुर्यात्। तदा सर्वमशेषजातीयमुन्मदिष्णु सत्। उन्मदिष्णुभावे सति। नन्वधु-[154-b]-ना विक्रयक्रयावसरे वटीं कपर्दिकामपि लब्धुं जातं सम्पन्नं सत्। तौ काविव्याह। कराग्रे जाग्रत्यो लक्षणयातिस्वाधीना शतं कोटयोऽर्थादुङ्कादीनां यस्य स एतादृशो धनी ययोरर्थी यत्नवान्। अधुना प्रत्यक्षव्यवहारे तावद् बिल्वं कपर्दमात्रमपि न लभते। कश्चन कपर्दमात्रेणापि यन्न क्रीणीते। तत् कथमिवोक्तयुक्त्यापात-बहुमूल्यावेतौ तुलयेत्। चेत् तुलयेत् तर्ह्युन्मदिष्णु उन्मदितं सत् तुलयेत्।

उन्मत्तो हि भिक्षुकोऽपि महेश्वरेण महाधनिना निजतुलामुद्भावयति । उन्मदिष्णु च बिल्वफलं रूपेणातीव मनोहरं भवति । अतस्तद्वतस्थं तुलयेदिति भावः । तच्च कोऽपि न विक्रीणीते, तज्जनितविकारकृतनिग्रहभयात् । उन्माद्यतीत्येवंशीलमुन्मदिष्णु । इत्यर्थोऽप्यवगन्तव्यः । न हि तन्माद्यत्यपि तु मदयति सर्वमिति यत् स्वभावादुन्मदिष्णु; अन्यदपि यन्न तथा तदपि । अन्यथाऽपि सहृदयैरस्य श्लोकस्यार्थः समर्थनीयः । वटी कपर्दिका । अथवा गौडदेशभाषया प्रसिद्धा गौटाख्या गुलिका । लाटदेशे प्रसिद्धा खोटा नाम्नी वा । उन्मदिष्णु सत् श्रीफलं यदि तौ तुलयेत्, तदा तदुन्मत्तत्वादेव कपर्दिकामपि मूल्यं नार्हतीति वा व्याख्या ॥७९॥

स्तनान्तरे चन्दनपङ्किलेऽस्या भातस्य यावद्युवमानसानाम् ।
हारावलीरत्नमयूखधाराकाराः स्फुरन्ति स्खलनस्य लेखाः ॥८०॥

अस्या मलयजद्रवकर्दमाधिके कुचमध्ये भातस्य सम्पन्नस्य यावद्युवमानसानां सकलतरुणचित्तानां स्खलनस्य गतिभङ्गस्य लेखा राज्यः स्फुरन्ति समुल्लसन्ति । कीदृश्यः ? हारावल्क्या रत्नानां मयूखास्तेषां धारा प्रतानास्तदनुकारास्तद्रूपधारिण्यः । यावदित्यव्ययं साकल्ये । स्खलनमत्र पिच्छलदेशे प्रसिद्धम् । यस्य लोके जिफिल्लण-संज्ञा । ता हि लेखास्तत्क्षणं चकचकायन्तेऽत एव स्फुरन्तीत्युक्तम् ॥८०॥

क्षीणेन मध्येऽपि सतोदरेण यत्प्राप्यते नाक्रमणं बलिभ्यः ।
सर्वाङ्गशुद्धौ तदनङ्गराज्यविजृम्भितं भीमभुवीह चित्रम् ॥८१॥

चित्रमाश्चर्यम् । इह भीमभुवि दमयन्त्यां तदनङ्गराज्यस्य कामाधिपत्यस्य विजृम्भितमुल्लसितम् । कीदृश्याम् ? सर्वेषामङ्गानामवयवानां शुद्धिर्निर्दोषता यत्र तस्याम् । तत्किमित्याह । यन्मध्ये क्षीणेन तनुतरेणापि सतोदरेण वलिभ्यस्त्रिसृभ्यो मांससङ्कोचलेखाभ्यः सकाशादाक्रमणं बाधाधिष्ठानकृता नाप्यते (न प्राप्यते), न लभ्यते, कामाधिष्ठितत्वात् । सविभ्रमं सा तथा विचेष्टते । यथा खलूदरस्य मध्ये कृशीयसोऽपि वलीकृतमाक्रमणं न भवति । अथा-[155.a]-र्थान्तरम् ।

आश्चर्यम् । इह भीमभुवि भयानकायां भूमौ तदनङ्गस्य स्वाम्यमात्यादि-सप्ताङ्गरहितस्य राज्यस्य महदपरपर्यायस्य विजृम्भितम् । यदुदरेणोदरनाम्ना केनापि मध्येऽन्तः । क्षीणेन निःसारेणाप्यबलेनापि सता बलिभ्यो बलवद्भ्यः सकाशादाक्रमणं बाधा न प्राप्यते । क्षीणाङ्गे हि राज्ये बलवानबलमाक्रमति ॥८२॥

मध्यं तनूकृत्य यदीदमीयं वेधा न दध्यात्कमनीयमंशम् ।
केन स्तनौ सम्प्रति यौवनेऽस्याः सृजेदनन्यप्रतिमाऽङ्गदीप्तेः ॥८२॥

अस्या इदमिदमीयं मध्यं तनूकृत्य निस्सार्य च यदि वेधा मनोहरं भागं न धारयेत्, तर्हीदानीं तारुण्यदशायामस्याः सर्वोत्कृष्टदेहभासः। कुचौ केन वस्तुना निर्मायात् ॥८२॥

गौरीव पत्या सुभगा कदाचित्कर्त्रेयमप्यर्धतनूसमस्याम् ।
इतीव मध्ये निदधे विधाता रोमावलीमेचकसूत्रमस्याः ॥८३॥

यथा गौरी सुभगा, तथेयमपि सुभगा। अत इयमपि सुभगा गौरीव पत्या सह कदाचिदर्धदेहसमसन्नं कर्ता करिष्यति' इति हेतोर्विधाताऽस्या मध्ये रोमावलीमेव मेचकं कृष्णं सूत्रं निदधे। अन्योऽपि स्थपतिः सूत्रधारः कस्यापि गृहादिभूमेरर्धार्ध-भागं विधित्सुः कज्जलमेचकीकृतं सूत्रं धारयति यन्मूलास्य सूत्रधारसंज्ञा ॥८३॥

रोमावलीरज्जुमुरोजकुम्भौ गम्भीरमासाद्य च नाभिकूपम् ।
मद्दृष्टितृष्णा विरमेद्यदि स्यान्नैषां वतैषा सिचयेन गुप्तिः ॥८४॥

रोमावल्येव रज्जुः। उरोजावेव कुम्भौ। गम्भीरश्च नाभिरेव कूपः। एतत् त्रयं प्राप्य मम दृष्टेस्तृष्णा पिपासा समुपशाम्येत्। बत खेदे। यद्यसिचयेन स्वड्गनिचयेनैषां त्रयाणामपि गुप्ती रक्षा न स्यात्। नन्वतस्तु तृष्णा महती दर्शनस्पृहा। सिचयेन वाससा। छलपक्षे त्यकारप्रश्लेषादसिचयेनेति व्याख्यातमेव ॥८४॥

उन्मूलितालानबिलाभनाभिश्छिन्नस्खलच्छृङ्खलरोमदामा ।
मत्तस्य सेयं मदनद्विपस्य प्रस्वापवप्रोच्चकुचास्तु वास्तु ॥८५॥

सेयं दमयन्ती मत्तस्य मदावस्थां प्राप्तस्य कामकरिणो वास्तु वेश्मभूरस्तु भवतु। यतः कीदृशीति। तद्वासभूमिचिह्नमाह। उन्मूलितमुत्पाटितं यदालानं बन्धनस्तम्भस्तस्य बिलं तस्येवाभासं स्थानं यस्या एवंभूता नाभिर्यत्र। मत्तः खलु दन्तावलो गज आला-नमुन्मूलयति। किञ्च छिन्नं सत् स्खलत् स्रंसमानं यच्छृङ्खलं निगडस्तद्रूपं रोम-दाम रोमावली यत्र। मत्तः करी कृष्णाय सभयमपि लोहमयं शृङ्खलं छिनत्ति। तथा प्रस्वापस्य निद्राया वप्रौ तद्वदुच्चौ कुचौ यत्र। यत्र गजः प्रस्वपिति तत्र कुक्षि-[155. b]-पक्षद्वये ह्युच्चौ वप्रौ क्रियेते। 'वेश्मभूर्वास्तुरस्त्रियाम्' ॥८५॥

रोमावलिभ्रूकुसुमैः स्वमौर्वीचापेषुभिर्मध्यललाटमूर्ध्नि ।
व्यस्तैरपि स्थास्नुभिरेतदीयैर्जैत्रः स चित्रं रतिजानिवीरः ॥८६॥

चित्रं स कामसुभटो जैत्रो जेता । कैः ? अस्या मध्यं च ललाटं च मूर्धा च मध्य-
-ललाटमूर्धानस्तत्र वर्तमानैः । रोमावली च भ्रुवौ च कुसुमानि च तैरेव स्वस्य मौर्वी
च चापं चेषवश्च तैर्व्यस्तैर्विक्षिप्तैरपि स्थास्नुभिः स्थितिशीलैः । अस्या इमान्येतदीयानि
तैः । रतिर्जाया यस्य स रतिजानिः ॥८६॥

अस्याः खलु ग्रन्थिनिबद्धकेशमल्लीकदम्बप्रतिबिम्बवेषात् ।
स्मरप्रशस्ती रजताक्षरेयं पृष्ठस्थलीहाटकपट्टिकायाम् ॥८७॥

अस्याः पृष्ठस्थल्येव हाटकस्य सुवर्णस्य पट्टिका तस्यामियं रजताक्षरा रूप्य
वर्णा स्मरस्य प्रशस्तिर्वर्णनास्ति । कस्मात् ? ग्रन्थिना निबद्धाः संयता ये केशास्तत्र
यन्मल्लीकुसुमानां निकुरम्बं, तस्य प्रतिबिम्बः प्रतिफलनं स एव वेषो रूपान्तरं,
तस्मात् । विजयिनो राज्ञः प्रशस्तिः कनकपट्टिकायां लिख्यते ॥८७॥

चक्रेण विश्वं युधि मत्स्यकेतुः पितुर्जितं वीक्ष्य सुदर्शनेन ।
जगज्जिगीषत्यमुना नितम्बमयेन किं दुर्लभदर्शनेन ॥८८॥

मत्स्यकेतुः पितुर्विष्णोः सुदर्शनाख्येन चक्रेण । अथ च सुखेन दर्शनं यस्य
तेन युधि विश्वं जितं वीक्ष्यामुना नितम्बरूपेण दुर्लभदर्शनेन, दुर्लभं दर्शनं यस्य,
तेन कृत्वा, जगत्किं जेतुमिच्छति । पितुः सकाशाद् हि पुत्रेण केनापि गुणेन यशः
प्राप्तये विशिष्टेन भाव्यम् । सुलभदुर्लभदर्शनकृत एवात्र विशेषः ।

तत्त्वतस्तु सुदर्शनमिति नामैवैकस्य द्वितीयस्य तु दुर्लभदर्शनत्वं चीन-
-दुकूलाच्छादितत्वात् । विश्वं जगदिति पौनरुक्त्यमुक्तिप्रत्युक्तिभङ्ग्या न दोषः । विश्वं
समस्तं जगदिदं व्याख्येयम् ॥८८॥

रोमावलीदण्डनितम्बचक्रे गुणं च लावण्यजलं च बाला ।
तारुण्यमूर्तेः कुचकुम्भकर्तुर्बिभर्ति शङ्के सहकारिचक्रम् ॥८९॥

शङ्के बाला सहकारिणां कारणानां चक्रं निचयं धत्ते । कस्य ? कुचावेव कुम्भौ,
तान् (तयोः) कर्तुः । कीदृशस्य ? तारुण्यमूर्तेः तारुण्यमेव हि कुचकुम्भौ घटयति ।
किं किं बिभर्ति तदाह । रोमावल्येव दण्डो, नितम्ब एव चक्रं, ते द्वे । गुणं च सूत्रम् ।
तत्त्वतस्तु गुणं सौन्दर्यादिकमेव । लावण्यमेव च जलम् । एतत् सहकारिचक्रम् ।
विना सहक समवायिकारणं मृदं कुम्भकारः कुम्भत्वं नेतुं न क्षमते ॥८९॥

अङ्गेन केनापि विजेतुमस्या [156-a] गवेष्यते किं चलपत्रपत्रम्।

न चेद्विशेषादितरच्छदेभ्यस्तस्यास्तु कम्पस्तु कुतो भयेन ॥९०॥

अस्याः केनापि गोप्यतमेनाऽङ्गेन, किं चलपत्रस्य पत्रं विजेतुं गवेष्यते चिन्त्यते। चेन्नैवं तु पुनस्तस्य [1] चलपत्रपत्रस्येतरच्छदेभ्यो वटादिपत्रेभ्यः सकाशाद् विशेषेण कुतः कस्मात्(द्) वस्तुनो भयेन कम्पोऽस्तु ॥९०॥

भ्रूश्चित्रलेखा च तिलोत्तमास्या नासा च रम्भा च यदूरुसृष्टिः।

दृष्टा ततः पूरयतीयमेकानेकाप्सरःप्रेक्षणकौतुकानि ॥९१॥

यत्कारणादस्या भ्रूश्चित्रलेखा नामाऽप्सरसश्च, नासा, तिलोत्तमा नामाऽप्सरसश्च। ऊरुसृष्टि(ष्टी) रम्भा नामाऽप्सरसश्च। चकारत्रयं समुच्चीयमानानां स्वप्राधान्यमाह। ततः कारणादियमेकैव दृष्टा सती, [2] अनेकासामप्सरसां प्रेक्षणस्य प्रेक्षणकस्य नृत्यविशेषस्य कौतुकानि पूरयति। अथ च प्रेक्षणं दर्शनमेव। तत्त्वतस्तु चित्रासु संस्थाना लेखा रेखैव यस्याः सा भ्रूः। तिलककुसुमवदुत्तमा नासा। ऊर्वोः सृष्टि-निर्मिती रम्भा कदल्येव। अत एवाद्भुतरूपत्वादेकापीयं दृष्टा सती बहूनामप्सरसां दर्शने यत् सुखं तज्जनयतीत्यर्थः ॥९१॥

रम्भापि किं चिह्नयति प्रकाण्डं न चात्मनः स्वेन न चैतदूरू।

स्वस्यैव येनोपरि सा ददाना पत्राणि जागर्त्यनयोर्भ्रमेण ॥९२॥

रम्भा कदल्यपि किमात्मनः प्रकाण्डं च स्वेनैवात्मनैव न चिह्नयति। उपलक्षयति। एतस्या ऊरू च न चिह्नयति। येन हेतुना सा रम्भाऽनयोरूर्वोर्भ्रमेण स्वस्यैवात्मन एवोपरि प्रतिवादिशिरस्त्वपरिकल्पिते स्थाने पत्राणि विजयाख्यापकानि। स्वप्रतिज्ञा-श्लोकार्धाङ्कितानि भूर्जानि ददती विन्यस्यन्ती जागर्ति, प्रकाशीभवति, रक्षती-त्यर्थः। प्रतिवादिनि उपरि वादिना पत्रं दीयत इति स्थितिः।

तत्त्वतस्तु कदली स्वस्योपरि पत्राणि निजदलानि ददती दृश्यत एव। चकारद्वयं स्वप्राधान्यं कथयद् द्वयोरति[3]साम्यं द्योतयति। अतिसादृश्यात्तु वस्तुनस्तत्त्वातत्त्वविवेचने भ्रमो भवत्येव ॥९२॥

विधाय मूर्धानमधश्चरं चेन्मुञ्चेत्तपोभिः स्वमसारभावम्।

जाड्यं च नाञ्चेत्कदली बलीयस्तदा यदि स्यादिदमूरुचारुः ॥९३॥

1. B1. marginalia. निश्चलपत्रेभ्यो वटादिभ्यः। आदिशब्दादन्येभ्योऽपि.
2. D. अनेन कासां. 3. B1. -रपि-

अस्या ऊरू इदमूरू तद्वच्चारुः रुचिरा यदि परं कदली तदा स्यात्। तदा कदेत्याह। चेद्यदि मूर्धानं मस्तकमधश्चरमधोगतं विधाय तपोभिः पञ्चाग्निसाधनादिभिः कृत्वा स्वमात्मीयमसारभावं निःसारत्वं त्यजेत्। यदि च बलीयोऽधिकं जाड्यं, जडत्वं नाञ्चेत् प्राप्नुयात्। कदल्यां हि निःसारत्वमदार्ढ्यं प्रसिद्धमेव सर्वकालं च शैत्यम्। एतौ च [१८८·७] ससारौ घनत्वेन सर्वोत्कृष्टत्वेन वा। शैत्यं चानयोरुष्णकाले शीतकाले त्वौष्ण्यम्। अथ च तपोभिर्विना निःसारतारिक्तत्वमर्थाद् दार्ढ्यं जाड्यं च जडत्वं मूर्खत्वहेतुभूतं न याति। ऊर्ध्वाधःस्थितिविपर्ययेण यदि कदली तिष्ठेद्यदि च ससारा स्याद्यदि च शीतर्त्तावुष्णाशीता चोष्णर्त्तौ भवेत्, तदा दमयन्त्या ऊरुवच्चारुर्भवेत्। न तथाऽप्युपमानम् ॥९३॥

✓ ऊरुप्रकाण्डद्वितयेन तन्व्या

× ऊरुप्रकाण्डेन खलु प्रियायाः करः पराजीयत वारणीयः।

युक्तं ह्रिया कुण्डलनच्छलेन गोपायति स्वं मुखपुष्करं सः ॥९४॥

ऊरुस्तम्भयुगेन कृशाङ्ग्या वारणसंबन्धी हस्तः पराजितः। कुण्डलनमिषात्कुञ्चितं स लज्जयैव निजं मुखाग्रं गुप्तमदृश्यं करोतीत्यनुमानमेवात्र। पराजितोऽवश्यं लज्जया मुखं गोपायति। पुष्करं करिहस्ताग्रमत्र ॥९४॥

अस्यां मुनीनामपि मोहमूहे भृगुर्महान् यत्कुचशैलशीली।

नानारदाह्लादि मुखं श्रितोरुर्व्यासो महाभारतसर्गयोग्यः ॥९५॥

अस्यां मुनीनामपि मोहमूहे तर्केऽस्यां मुनयोऽपि मोहं व्यसनितां प्राप्ता इत्यहं सम्भावयामि। तथा हि तादृशो महान् यमनियमादिभिरसौ भृगुर्नाम मुनिः कुचावेव शैलौ तौ शीलयत इत्येवंशीलोऽस्ति। मुखं च नैवानारदाह्लादि, अपि तु नारदाह्लादि। नारदेन कृत्वाऽऽह्लादते नारदाह्लादि, न नारदाह्लाद्यनारदाह्लादि। ततो भूयोऽपि नञ् समासः। द्वौ नञौ मुख्यमर्थं ब्रूतः। मुखमस्या नारदनाम्ना मुनिनाऽतीवाह्लादमानमस्तीत्यर्थः। तथा व्यासो नाम मुनिः श्रितोरुरस्ति। श्रितावूरू येन स श्रितोरुः। कीदृशो व्यासः। महाभारताख्यस्याख्यानरत्नाकरस्य शास्त्रस्य सर्गाः प्रकरणसमुदायमथा वृद्ध्या अध्यायविशेषास्तत्र योग्योऽर्हः। तत्रावश्यं तस्यैव योग्यता। तच्चतस्तु भृगुः प्रपातः। स कुचशैलसमीपालय इति कुचयोरत्युच्चता सूचिता। मुखं नानारूपै रदैर्दन्तैर्ह्लादन-शीलम्। व्यासो विस्तीर्णतालक्षणः श्रितोरुः। कीदृशः? महती भाः कान्तिर्यत्र स महाभाः। पुनः कीदृशः? रतं निधुवनं, तस्य सर्गः सृजनं बहुधा विधानं तत्र योग्यः उचितः।

तथा विशालयोरूर्वोर्हि सुरतप्रपञ्चः समुज्जृम्भते। मुनीनामपि मोहमूहे। अत्र मुनीनामपि सद्भावभ्रान्तिर्भवतीति व्याख्येयम्। श्लेषादौ कुचयोः शैलत्वरूपणादि न दोषः। अन्यत्र तु दोष एव। यथा -'पाताल इव नाभिस्ते स्तनौ पर्वतोपमौ' इत्यादि ॥९५॥

क्रमोद्गता पीवरताधिजङ्घं वृक्षाधिरूढं विदुषी किमस्याः।

अपि भ्रमीभङ्गिभि-[151-a]-रावृताङ्गं वासो लतावेष्टितकप्रवीणम् ॥९६॥

अस्या अधिजङ्घं जङ्घयोर्विषये क्रमेणोद्गताऽधिष्ठिता पीवरता परिणाहिता किं वृक्षाधिरूढं वृक्षाधिरोहणम्। विदुषी जानती वर्तते। वासोऽपि भ्रमीभङ्गिभिर्भ्रमणविच्छित्तिभिरावृतमाच्छादितमङ्गं येन तत् तथाविधं किं लतावेष्टिते प्रवीणं कुशलम्। यथा लता तरुं वेष्टयति, तथेदमपि सम्यग् वेष्टितुं किं जानाति। विदर्भदेशनार्यो लतावेष्टनरीत्या वासांसि निवसन्ते। एतच्च तादृश[1]ध्वनौ प्रत्यक्षमेव। तत्त्वतस्तु वृक्षाधिरूढं लतावेष्टितकं चालिङ्गनभेदौ कामकलाशास्त्रप्रसिद्धौ ॥९६॥

अरुन्धतीकामपुरन्ध्रिलक्ष्मीजम्भद्विषद्दारनवाम्बिकानाम्।

चतुर्दशीयं तदिहोचितैव गुल्फद्वयाप्ता यदृश्यसिद्धिः ॥९७॥

अरुन्धती वसिष्ठपत्नी तावदेका, कामपुरन्ध्रिश्च रतिर्द्वितीया, लक्ष्मीः श्रीस्तृतीया, [2]जम्भद्विषन्निन्द्रस्तस्य दारा इन्द्राणी चतुर्थी, नवसङ्ख्याकास्त्वम्बिका दुर्गा, एतासां त्रयोदशानां पूरणी चतुर्दशी चेयं दमयन्ती, तत्कारणाद् गुल्फद्वयेनाप्ता लब्धा यदिहादृश्यसिद्धिः, सा खल्विहोचितैव, युक्ता खलु। यदि ह्यस्याः गुल्फौ स्थूलत्वाद् दृश्यौ भवेतां तदेयमेतासु पूरणत्वेन गणनां नाप्नुयात्। दृश्यगुल्फत्वस्य स्त्रीणामतीव गर्हितत्वात्। अथ चेयं चतुर्दशी नाम तिथिस्तत्र च साधकैर्यददृश्यसिद्धिः प्राप्यते, सा समुचितैव। अत्र गुल्फद्वयमेव साधकमदृश्यसिद्धेस्तस्या दृश्यमानत्वाद् गुल्फद्वयेन घुटिकायुगेनाप्ता लब्धा गुल्फद्वयाप्ता ॥९७॥

अस्याः पदौ चारुतया महान्तावपेक्ष्य सौक्ष्म्याल्लवभावभाजः।

जाता प्रवालस्य महीरुहाणां जानीमहे पल्लवशब्दलब्धिः ॥९८॥

जानीमहे महीरुहाणां प्रवालस्य नवदलाङ्कुरस्य यत्पल्लव इत्यस्य शब्दस्य नाम्नो लब्धिर्जाता। तच्चारुतया कृत्वा महान्तावुत्कृष्टतरावस्याः पदावपेक्ष्य विचार्य सौक्ष्म्याल्लवभावभाजो लेशत्वयुक्तस्य। एतस्याः पदौ चारुतयाऽतीव महान्तौ तयोरपेक्षया

---

1. A. तद्देश- 2. B. जृम्भ-

महीरुहाणां प्रवालस्यारुततया सूक्ष्मोऽतः सोऽस्याः पदे लवः पल्लव इति । योगयुक्त्या स पल्लवनामा जात इत्यर्थः । अस्याः पदोरेवमपि लवप्राप्तिरपि तयोर्लब्धिर्बहुतरो लाभः ॥९८॥

जगद्वधूमूर्धसु रूपगर्वाद्यदेतयाधायि पदारविन्दम् ।
तत्सान्द्रसिन्दूरपरागरागैर्द्वयं प्रवालप्रबलारुणं तत् ॥९९॥

विश्वपुरन्ध्रिशिरःसु लावण्यगर्वाधिक्यतया चरणजलजं निहितम् । अत एव तेषां घनसिन्दूररेणुरञ्जनैरेव तद्द्वयमुभयरूपं प्रवालवत् पल्लवविद्रुमवदधिकलोहितमस्तीति । आपातमात्ररमणीयानि कवीनां [157-6] वचांसीत्यत्रापि सम्भावना दिविप्रतिपत्ति- -र्नोद्भावनीया । एवमन्यत्र ॥९९॥

रुषारुणा सर्वगुणैर्जयन्त्या भैम्याः पदं श्रीः स्म विधिं वृणीते ।
ध्रुवं स नामच्छलयन्ततः सा भृशारुणैतत्पदभाग्विभाति ॥१००॥

क्रोधेन लोहिनी सती श्रीः सर्वैरेव गुणैर्जयन्त्या भैम्याः पदं विधिं वृणीते स्म । भगवन् विधे, त्वं मह्यं भैमीपदं देहीत्ययाचत । ध्रुवं नूनं स विधिस्तामेवंरूपां पदशब्दप्रयोगेण स्थानं वृणानामच्छलयच्छलयति स्म । अर्थविकल्पनया वचन- -विघातश्छलम् । शब्दच्छलेन स भैम्याः पदं चरणलक्षणं दत्तवान् । पदशब्देन चरणमप्यभिधीयते । त्वं भैम्याः पदं वृणीषे लोहिनी सती तर्हि तुभ्यमेवंरूपाया एव तत्पदं दत्तमित्युक्त्वा स तस्यै तद्दावित्यर्थः । श्रीशब्दस्योभयार्थत्वादित्थमुक्तिः । श्रीः प्रसिद्धा देवी कान्तिश्च ॥१००॥

यानेन तन्व्या जितदन्तिनाथौ पदाब्जराजौ परिशुद्धपार्ष्णी ।
जाने न शुश्रूषयितुं स्वमिच्छू नतेन मूर्ध्ना कतरस्य राज्ञः ॥१०१॥

तन्व्याः पदे एवाब्जराजौ श्रेष्ठे अब्जे । यानेन गमनेन कृत्वा जितदन्तिनाथौ परिभूतगजेन्द्रौ । तथा परि समन्तात् शुद्धावुज्ज्वलौ पार्ष्णी पाश्चात्यभागौ ययोस्तौ तथाभूतौ । न जाने कतमस्य प्रकृष्टस्य कस्य राज्ञो नृपस्य नतेन मूर्ध्ना प्रयोज्येन कर्त्रा स्वमात्मानं शुश्रूषयितुमिच्छू अभिलाषुकौ स्तः । न जाने कः सुकृती पति- -रस्या भविष्यतीति भावः । अथ चार्थान्तरम् । राजते रट् । पदाब्जे एव राजौ राजानौ नृपोत्तमौ यानेन यात्रया कृत्वा जितदन्तिनाथौ वशीकृतगजपतिनृपौ परिसमन्तात् शुद्धौ निर्वैरौ पार्ष्णी पाश्चात्यौ राजानौ ययोस्तौ तथाभूतौ न जाने कतमस्य राज्ञो नतेनोत्तमाङ्गेनात्मानं सेवयितुमिच्छू गजपती राजा

थात्रया चेज्जितस्ततोऽप्यधिकः कोऽस्ति। अत एव न जानेऽहमित्युक्तम्। जितदन्तिनाथौ सन्तौ सम्प्रति यानेन कृत्वा कं विगृहीतुमिच्छत इति व्याख्येयम् ॥१०१॥

कर्णाक्षिदन्तच्छदबाहुपाणिपदादिनः स्वाखिलतुल्यजेतुः।
उद्वेगभागद्वयताभिमानादिहैव वेधा व्यधित द्वितीयम् ॥१०२॥

कर्णौ चाक्षिणी च दन्तच्छदौ च पाणी च पदौ च तान्यादिर्यस्य तत्तथा। तस्य स्वाखिलतुल्यजेतुर्निजसमस्तसदृशपरिभावुकस्याद्वयताभिमानादेकत्वैकदर्पात् उद्वेगभाक् सन् वेधा इहैवास्यामेव द्वितीयं प्रतिपक्षमसृजत। न द्वयताऽद्वयतैकत्वमेव तस्या अभिमानोऽहमेक एव द्वयं नास्त्येव मल्लक्षणस्य [154.a] वस्तुन इत्येवमभिमान-स्तस्मादुद्विग्नेन वेधसा तेषां प्रत्येकं द्वितीयमिहैव सृष्टमित्यर्थः। समाहारस्य नपुंसक-त्वात् पदादिन इत्यत्र नामिनः स्वर इति नुरागमः। स्वाखिलतुल्यजेतुरित्यत्र तु भाषितपुंस्कत्वान्न भवति। आदिशब्दाद् दन्तपङ्क्तिभ्रूप्रभृतयः। अनन्वयोपमाया एव विवर्तोऽत्र ॥१०२॥

तुषारनिःशेषितपद्मसर्गं विधातुकामस्य पुनर्विधातुः।
पञ्चस्विहास्याङ्घ्रिकरेष्वभिख्याभिक्षाधुना माधुकरीसदृक्षा ॥१०३॥

हिमपातविनाशितां पद्मसृष्टिं पुनः कर्तुमिच्छतो विधेरिहैतेषु पञ्चसङ्ख्याकेषु मुख-पादपाणिषु सम्प्रति माधुकरी नाम्नी अभिख्यायाः परमशोभाया भिक्षा याञ्चा सदृक्षा सदृशी योग्येत्यर्थः। मधुकरस्येयं माधुकरी। मधुकरो हि भ्राम्यन् प्रतिकुसुमं मकरन्द-मादत्ते। इयं च प्रतिगृहमेव भिक्षुभिराहीयत इति माधुकरीव माधुकरी। सा च पञ्च-भिक्षाऽपि कथ्यत इति पञ्चग्रहणम् ॥१०३॥

एष्यन्ति यावद् गणनाद्दिगन्तान्नृपाः स्मरार्ताः शरणे प्रवेष्टुम्।
इमे पदाब्जे विधिनाऽपि सृष्टास्तावत्य एवाङ्गुलयोऽत्र रेखाः ॥१०४॥

स्मरार्ता नृपा यावत् सङ्ख्याकाद्दिगन्तादिमे पदाब्जे प्रत्यक्षे पद्मे कर्मलापन्ने शरणं रक्षकं प्रवेष्टुमेष्यन्त्यागमिष्यन्ति। विधिनाऽप्यङ्गुलिरूपास्तावत्य एवानयोः पदाब्जयो रेखाः सृष्टा दश दिगन्ता दशैव रेखा इत्यर्थः ॥१०४॥

प्रियान्वयीभूतवतो यदेदं व्यधाद्विधिः साधुदशत्वमिन्दोः।
एतत्पदच्छद्मसरागपद्मसौभाग्यभाग्यं कथमन्यथाऽस्य ॥१०५॥

विधिरिन्दोरिदं साधुदशत्वं शोभनावस्थत्वं व्यधात्। इदं किमित्याह। यद्य प्रियानखीभूतवतः प्रियाया अनखा नखा भूतवान् प्रियानखीभूतवान्, तस्य प्रियानखीभूतवतः। साध्वी दशा यस्य स साधुदशस्तस्य भावः साधुदशत्वम्। यद्य चन्द्रः प्रियानखत्वेन परिणतस्तद्य तस्य विधिना साधुदशत्वं कृतमित्यर्थः। अन्यथोक्तप्रकारवैपरीत्येनैतत्पदद्वयानी ये सरागे सानुरागे पद्मे कमले तयोर्यत्त सौभाग्यं लक्षणया रामणीयकं, तस्य भाग्यं शुभं कर्म कथमस्य। एतत् संविधानकं विना नैतद् घटते। सरागं कमलं हि रात्रौ सङ्कुचितत्वात् कदाचिदपि चन्द्रं न सेवते।

तत्त्वतस्तु दशानां दशसङ्ख्यानां भावो दशत्वम्। सह रागेण लौहित्येन वर्तते सरागे। पद्मशब्दादेव रागे लब्धे सरागग्रहणमाधिक्यार्थम्। यावक[1] (अलक्तक)-लक्षणो वा रागोऽत्र ॥१०५॥

[2] यशः पदाङ्गुष्ठनखौ मुखं च बिभर्ति पूर्णेन्दुचतुष्टयं या।
कलाचतुःषष्टिरुपैतु वासं तेषां कथं सुभ्रुवि नाम नास्याम् ॥१०६॥

कलाप्रावीण्य प्राधान्यार्थमङ्गुष्ठनखौ वर्णयति। कीर्तिं पदाङ्गुष्ठनखौ मुखं चैतद्रूपं षोडशकलं चन्द्रचतुष्टयमियं बिभर्ति तस्यामस्यां चतुरधिका षष्टिः कला कथं नाम स्थितिं नोपैतु। अपि तु प्राप्नोत्विति युक्तमेतत् षोडशकलवचनम्। कलानां चतुःषष्टिरिति व्याख्येयम्। कलाश्चतुःषष्टिरिति व्याख्येयपाठे कलारूपाश्चतुःषष्टिरिति व्याख्येयम्। रूपकानुप्रासौ। शतसहस्रान्ताच्च निष्कादिति ज्ञापकात् कलेति समासः ॥१०६॥

सृष्यातिविश्वा विधिनैव तावत् तस्यापि नीतोपरि यौवनेन।
वैदग्ध्यमध्याप्य मनोभुवेयमवापिता वाक्पथपारमेव ॥१०७॥

इयं तावद् विधिनैवातिविश्वा विश्वमतिक्रान्ता सृष्टा। तस्याप्युपरि यौवनेन नीता। मनोभुवा पुनर्वैदग्ध्यं चातुर्यं पाठयित्वा वचनागोचरैव कृता ॥१०७॥

इति स चिकुरादारभ्यैनां नखावधि वर्णयन्
हरिणरमणीनेत्रां चिन्ताम्बुधौ तरदन्तरः।
हृदयभरणोद्वेल्लानन्दः सखीकृतभीमजा-
-नयनविषयीभावे भावं बभार भुवो विभुः ॥१०८॥

1. B1. marginalia अलक्तक.
2. D. om. यशः ...... समासः ॥१०६॥.

स भूपालनिर्वयस्यावेष्टित भैमीलोचनगोचरीभवने वासनामकरोत् । कीदृशः ? स्वान्त-
-पूरणोल्लङ्घितावधिहर्षः । किं कुर्वन् ? आश्चर्याब्धौ प्लवमानमानसः । स तां[1] मृगदृशं
केशात् प्रभृति चरणनखान्यावद्वर्णयन् विसृतगुणगणनां[2] कुर्वन् । हरिणीवृत्तम् ॥१०८॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
गौडोर्वीशकुलप्रशस्तिभणितिभ्रातर्ययं तन्महा-
-काव्ये चारुणि वैरसेनिचरिते सर्गोऽगमत् सप्तमः ॥१०९॥

गौडोर्वीशयशःप्रशस्तिरचनाया भ्रातृत्वं, तस्या अपि श्रीहर्षादेव जातत्वात् ॥१०९॥

शाण्डिल्य[1]नाम मुनिवंशकरीरकस्य
श्रीधीरधीरतनयस्य गदाधरस्य ।
क्लृप्तौ सुधामधुनि नैषधटीकिकायां
सर्गोऽत्र सप्तम इति प्रतिपूर्यते स्म ॥१॥

[3] गदाधरटीकायां सप्तमसर्गः समाप्तिमबीभजत् ॥ श्रीरस्तु ॥

1. B1, B. सस्तां. 2. B. गणी. 3. B. om. गदाधरी- --- श्रीरस्तु ॥.